कर्नाटकसारस्वतोपासकाः
परिचयग्रन्थमाला

४

बसवप्पशास्त्री

विद्वान् एच्. वि. नागराजराव्



KARNATAKA SAMSKRIT UNIVERSITY

विद्वान् एच्.वि. नागराजराव्

समग्रे प्रपञ्चे संस्कृतक्षेत्रे सुविख्यातनामा प्रो।। एच्.वि. नागराजराव् महोदयः पाण्डित्यकवित्वयोः सङ्गमः । संस्कृते प्रकाण्डः पण्डितः उत्तमवाग्मी च । न केवलं संस्कृते, किन्तु आंग्लतेलगुहिन्दीभाषास्वपि निष्णातः अयं अन्ताराष्ट्रियस्तरे प्रसिद्धः वर्तते । विश्वस्य बहुषु विश्वविद्यालयेषु सन्दर्शकप्राध्यापकः च अस्ति । स्वीयमेधया, अप्रतिमस्मरणशक्त्या विद्यां तथा जग्राह यथा अद्यत्वे संस्कृतस्य चलन् विश्वकोशः इव विराजते ।

१९४२ तमे वर्षे कोलारमण्डलस्य सोमेनहळ्ळिनामके ग्रामे लब्धजन्मा अयं मैसूरुनगरस्थमहाराजसंस्कृतमहापाठशालायां व्याकरणालङ्कारयोः शास्त्रयोः विद्वत्पदवीमवाप । मैसूरुनगरे एव विज्ञानविषयमप्यधीतवान् । एवं संस्कृते स्नातकोत्तरपदवीं मैसूरुविश्वविद्यालयतः अमेरिकादेशस्य सियाटल् विश्वविद्यालयतश्चावाप ।

एषः प्राच्यविद्यासंशोधनालये संशोधकत्वेन नियुक्तः तत्र बहून् ग्रन्थान् सम्पादितवान्, अनूदितवान्, विरचितवान् च । अयं न केवलं विद्वान् किन्तु सरसकविः । विदुलापुत्रीयम्, समुद्यता, दाम्पत्यकलह इति तस्य त्रीणि नाटकानि, १९९६ तमे वर्षे भारतीयविद्याभवनतः प्रकाशितानि । वरान्वेषणम्, मालविकेति लघुकथाद्वयं १९७४ तमे वर्षे प्रकाशितम् । एवं तेन पूज्यश्री शिवकुमारस्वामिनः आत्मचरितं, प्रवासकथा, नैकाः कथाश्च विरचिताः । श्री एस्.एल्. भैरप्पमहोदयस्य सार्थं संस्कृते अनूदितवान् । विमर्शग्रन्थाः अपि बहवः ग्रथिताः । प्राचीनग्रन्थाः आंग्लसंस्कृतभाषा-व्याख्यानादिभिः सम्पादिताः ।

बह्व्यः प्रशस्तयः अपि एनमन्वसरन् । वेदव्यासप्रशस्तिः, २००६ तमे वर्षे केन्द्रसाहित्यअकाडेमिप्रशस्तिः, राष्ट्रपतिपुरस्कारः प्राप्तः अनेन विदुषा । एषः चिकागो, जेरुसेलेम्, विस्कोन्सिन् विश्वविद्यालयेषु अयं सन्दर्शकप्राध्यापकः अस्ति । सुधर्मादिनपत्रिकायाः गौरवसम्पादकः आस्ते ।

2

समर्पणम्

श्रीबसवप्पशास्त्रिसाहित्यप्रसाराय कृतभूरिपरिश्रमेभ्यो मम गुरूवर्येभ्यः आस्थानविद्वत्पदवीभूषितेभ्यः कीर्तिकायेभ्यः श्री एम्.जि. नञ्जुण्डाराध्येभ्यः ग्रन्थमिमं सप्रश्रयं समर्पयामि

– लेखकः

कर्नाटकसारस्वतोपासकाः
परिचयग्रन्थमाला

श्रीबसवप्पशास्त्री

विद्वान् एच्.वि. नागराजराव्

कर्नाटकसंस्कृतविश्वविद्यालयः
पम्पमहाकविमार्गः, चामराजपेटे
बेङ्गळूरुः–५६००१८

SHRI BASAVAPPA SHASTRY

Author:

Vidvan H.V. Nagarajarao

No. 90, Navilu Road, 9th Cross, Mysore - 570023.

Published by

Prasaranga
Karnataka Samskrita University

Pampa Mahakavi Road,Chamarajpet

Bangalore - 560018

Ph.: 080 - 2670 1303, 26705387

Copies can be had from:

Samskrita Bharati

'Aksharam', 8th Cross, 2nd Stage,

Girinagar, Bangalore - 560085.

Phone: 080 - 26722576 / 26721052

First Impression: 2013

Paper used: 70GSM NS book print

Copies: 1000

Page: vi + 74 = 80

Price: Rs. 50/-

ಸ್ವಾನ್ ಪ್ರಿಂಟರ್ಸ್

www.svanprinters.com

☎ 080-26742233

कुलपतिवचनम्

जानन्त्येव हि तत्रभवन्तो भवन्तः प्राग् वर्षत्रयात् लब्धजन्मनः कर्नाटकसंस्कृतविश्वविद्यालयस्य प्रधानतमम् उद्देश्यद्वयं वेदवेदान्तादिशास्त्रेषु उन्नताध्ययनव्यवस्थापनं,शाधकार्यञ्चेति । विशिष्य एतद्द्वारा शास्त्रवाङ्मयस्य तत्त्वं समाजे व्यापयितुं विशेषोपन्यास ग्रन्थप्रकाशनादियोजनाभिः प्रयासः विहितः ।

संस्कृतभाषा, तत्साहित्यं, शास्त्रसम्पत् च अगाधशेवधिः । खननेन अधिकं वर्धते । एतस्य निधेः सम्यगवगमनं यथा प्रधानं, तथा तस्य सम्यगुपयोगः अपि प्रधानतामाप्नोति इति वयं जानीमः । कर्नाटकसंस्कृतविश्वविद्यालयः शासनाङ्गं, शैक्षणिकाङ्गं, प्रसाराङ्गम् च इति अङ्गत्रयं भजते । शासनाङ्गे कन्नडं, संस्कृतं आङ्ग्लं चेति तिसृणामपि भाषाणां परिक्रमः प्रचलति । शैक्षणिकाङ्गे क्वचित् कन्नडस्य, अधिकं संस्कृतस्योपयोगः भवेत् । प्रसाराङ्गे तु कन्नडसंस्कृतेः शास्त्रसम्पन्नतार्थं संस्कृतस्य प्रधानग्रन्थानां कन्नडानुवादः आवश्यकः। एवं अपूर्वग्रन्थानां आङ्ग्लभाषयामपि अनुवादः, संस्कृते स्वतन्त्रग्रन्थप्रकटणं च अस्माकं अग्रिमलक्ष्यं भवेत् ।

विश्वविद्यालयः प्राचीन–आधुनिकज्ञानयोः युक्तसंयोजने दत्तावधानः। प्राधान्येन एतत् शैक्षणिकाङ्गे भवेत् । केवलं परीक्षाप्रचालनं शैक्षणिकाङ्गस्य लक्ष्यं न । तदर्थं योग्यं पाठ्यं पूरकपाठ्यरचना, परामर्शनग्रन्थनिर्माणम् अपि प्रधानं भवति । एतदर्थं इदानीं प्रसाराङ्गः आरब्धः ।

कर्णाटकराज्यं बहु प्राचीनकाले अनल्पान् संस्कृतग्रन्थान् असृजत्। मध्यकालीनसन्दर्भेऽपि तत् समेधितं च । आधुनिककाले तु तस्य नूतनरीत्या अभिवर्धनस्यावश्यकता वर्तते । कर्णाटकराज्यं अभिलषितार्थचिन्तामणिः,

शिवतत्वरत्नाकरः इति बृहद्विश्वकोशद्वयं प्रायच्छत्। शतशः शास्त्रकाराः, व्याख्यानकाराश्चाभवन् अस्मिन् राज्ये। अनेके शास्त्रग्रन्थाः निर्मिताः। शताधिकाः व्याख्यानकाराः संस्कृते अन्यादृशव्याख्यानानि व्यरचयन्।

कर्णाटकराज्यस्य सुदीर्घे वाङ्मयेतिहासे अतिविशिष्टेन योगदानेन नक्षत्रायमानाः अनेके महान्तः विद्यन्ते । इदं संस्कृतसाहित्येतिवृत्तं स्वातन्त्र्यपूर्वकालीनयुगस्य संस्कृतसाहित्येतिहासं समीचीनतया चित्रयति। किन्तु स्वातन्त्र्यसङ्ग्रामस्य कालघट्टे प्रवृत्तस्य संस्कृतसाहित्यसर्जनस्य इतिवृत्तरचना सम्यक् न जाता । कालक्रमेण इदम् अन्धकारयुगमिव सम्पद्येत कदाचित् । अस्मात् कारणात् १८५० तः १९५० पर्यन्तम् एकस्य शताब्दस्य कालखण्डे कर्नाटकस्य विविधेषु प्रदेशेषु निवसतां संस्कृतवाङ्मयस्य महत्तां वर्धयितुं कारणीभूतानां महतां योगदानविषये, तेषां जीवनगाथाविषये च शतं पुस्तकानि प्रकाशनीयानि इति अस्माकम् आशयः । अनया योजनया संस्कृतवाङ्मयस्य नवेतिहासः निर्मितः भविष्यति। एतेन, आधुनिकयुगेन सह गतशताब्दस्य सांस्कृतिकबन्धोऽपि दृढो भविष्यति इति मे विश्वासः।

अस्यां ग्रन्थमालायां महोदयेन आस्थानविदुषां बसवप्पशास्त्रिमहोदयानां संस्कृतयोगदानमधिकृत्य विरचितं पुस्तकमिदं प्राकाश्यं नीयते। विद्वद्वरेण्यः कविः श्री एच्.वि. नागराजराव्महोदयः निरन्तरं संस्कृतशास्त्रसेवायां रतः शताधिकप्रबन्धकर्ता । अस्माकं प्रार्थनानुरोधेन ग्रन्थपुष्पिकामिमां अल्पे काले विरचय्य प्रदत्तवानिति तस्मै महाभागाय कार्तज्ञ्यं निवेदयामः ।

प्रो. मल्लेपुरं जि. वेङ्कटेशः, डि.लिट्

कुलपतिः

आस्थानविदुषः

श्रीबसवप्पशास्त्रिणश्चरितम्

कन्नडभाषा यत्र भाष्यते स कर्णाटदेशः। तत्र बभूवुर्बहवो दार्शनिकाः कवयो ग्रन्थकाराश्च नानामतानुयायिनः। संस्कृतभाषायां प्राकृतभाषायां देशभाषायां च तैर्ग्रन्था व्यरच्यन्त। जैनमतावलम्बिनः कुन्दकुन्दाचार्याः प्राकृतभाषायां, समन्तभद्राचार्याः संस्कृतभाषायां च दार्शनिकान् ग्रन्थान् प्रणिन्युः । कदम्बराजवंशस्य मयूरवर्मादयः संस्कृतवाण्यामेव शासनानि लेखयामासुः । कन्नडभाषायाम् आदिमाः कवयो जैना एवासन् । श्रीवैष्णवमतोद्धारका यतिराजशब्दवाच्याः श्रीमद्रामानुजाचार्या द्रविडदेशसंजाता अपि कर्णाटक-देशमागम्य यदुगिरिक्षेत्रे उषित्वा ग्रन्थरचनायां प्रवृत्ताः । शृंगगिरिक्षेत्रेऽद्वैतमतस्य समुद्धारकाः श्रीविद्यारण्यस्वामिनः वेदान्तपञ्चदशी- जीवन्मुक्तिविवेकादीन् ग्रन्थान् निबबन्धुः । श्रीमन्मध्वाचार्याः कर्णाटकदेशे एव संजाताः सकलनिगमागमनिष्णा द्वैतदर्शनं समग्रे भारतवर्षे प्रसारयाञ्चक्रुः । माध्ववाङ्मयतपस्विनां ग्रन्थकाराणां प्रदानमद्भुतं विद्योतते । काव्यानि नाटकानि चम्प्वः प्रबन्धाश्च संख्यातीता अस्य कर्णाटकराज्यस्य विपश्चिद्भिः प्राणीयन्त । कर्णाटदेशस्य नारीमणयोऽपि गङ्गादेवीप्रभृतयो देववाण्यां रमणीयानि काव्यानि न्यभान्त्सुः। अत्र बहवो राजानः कवीनां पोषकाः स्वयं कवयश्चाभवन् । वैपुल्ये च वैशद्ये च वैचित्र्ये चात्र समुद्भूतं साहित्यमनुपमम् । विजयनगरसाम्राज्यस्य, अथवा कर्णाटक-साम्राज्यस्य कालादनन्तरं महीशूरसंस्थानस्य प्रभवस्तां दिव्यां परम्पराम् अन्ववर्तयन् । देवभाषायै देशभाषायै च प्रोत्साहं दत्वा साहित्यस्रोतस्विनीं ते

सुष्ठु अवर्धयन् । सर्वेषु धर्मेषु सकलेषु दर्शनेषु च तैर्निष्पक्षपाता दृष्टिर्निहिता । गुणिनश्च गुणरागिणश्च ते महीशूरराज्यं साहित्यसम्पत्समृद्धं चक्रुः ।

क्रिस्तशकाष्टादशशतकस्योत्तरार्धे महीशूरराज्यस्याधिकारः परहस्तगतम् आसीत् । हैदरालिः तत्सुतः टिप्पुसुल्तानश्चेति द्वौ राज्यं शशासतुः । तस्य शतकस्यान्तिमे वर्षे संजाते संग्रामे टिप्पुसुल्तानो मृतः । युद्धे विजयं लब्धवन्तः पाश्चात्याः राज्याधिकारं पुनः महीशूरराज्यवंशस्य तृतीयकृष्णराजप्रभवे मुम्मडिकृष्णरज्यवोडेयर् इति प्रसिद्धाय समार्पयन् । तृतीयः कृष्णराजः स्वयं देशभाषानदीष्णः संस्कृतभाषानिष्णातश्चासीत् । भोजराज इवायं पण्डितान् कलाकारांश्च प्रेम्णा पोषयति स्म । शास्त्रसम्पद्रक्षणायानेन प्रभुणा महीशूर (मैसूरु) नगर्यां महाराजसंस्कृतपाठशाला प्रतिष्ठापिता । पण्डितानां कलाविदां च साहाय्येन श्रीतत्वनिधिर्नाम नवभागसहितः सचित्रो ग्रन्थो व्यरचि । अनेनैव राज्ञा पोषिताः गरलपुरीशशास्त्रिप्रभृतयः संस्कृतभाषायां काव्यानि प्राणैषुः । कन्नडभाषाया साहित्यं च राजाश्रये अवर्धत । साहित्यवृद्धौ अस्यां वीरशैवविदुषां च मुख्यं पात्रमासीत् । वीरशैवधर्म एकादशे शतमाने कर्नाटकदशे उत्तुङ्गताम् आप्नोत् । जगतां ज्योतिर्बसवेश्वरः, यं कन्नडभाषायां बसवण्ण इति प्रीत्याह्वयन्ति, अस्य धर्मस्य प्रतिष्ठापनेन महतीं धार्मिकीं सामाजिकीं च क्रान्तिम् असाधयत् । शिवशरणाः सर्वे समानाः, जन्मना न कोऽपि श्रेष्ठोऽधमो वा, भक्तस्य भगवतश्च मध्ये तृतीयस्य मध्यगस्य अपेक्षा नास्ति, सर्वः शिवशरणः शिवं साक्षात् पूजयितुम् अर्हः, पुरुषवत् स्त्री चाध्यात्मक्षेत्रे साधनां कर्तुं सिद्धिं प्राप्तुं च समर्था, सर्वोऽपि मानवः कायकं (शारीरं श्रमं) कृत्वा, समाजोपयोगि कार्यं निर्वर्त्य जीविकां सम्पादयेदिति बसवण्णः सर्वान् उपादिशत् । तेन सहाल्लमप्रभुः, चेन्नबसवण्णः सिद्धरामः, अक्कमहादेवीत्यादयः शरणधर्मं बोधयित्वा प्रसारयामासुः । एतेषामुपदेशाः 'वचन' शब्देनाभिधीयन्ते । वचनसाहित्यं कन्नडभाषायां विशिष्टं स्थानम् अलङ्करोति ।

यद्यपि वीरशैवधर्मस्य मुख्यं साहित्यं कन्नडभाषायाम् एव वर्तते, तथापि वीरशैवकवय उभयभाषाविद्वांस आसन् । वीरशैवदर्शनं शक्तिविशिष्टाद्वैतदर्शनमिति कथ्यते । तैः सिद्धान्तशिखामणिः, श्रीकरभाष्यम् इत्यादयो दर्शनग्रन्था विरचिताः । मायिदेवः अल्लमप्रभुदेवस्य वचनानां संस्कृतानुवादं कृतवान् । बसवपुराणादयश्च ग्रन्था देवभाषायां रचिता विलसन्ति । उभयभाषाकविः षडक्षरिदेवः संस्कृते कविकर्णरसायनाख्यं महाकाव्यं जग्रन्थ । टिप्पुसुल्तानस्य पतनादनन्तरं तृतीयः कृष्णराजः मुम्मडिकृष्णराजवोडेयर् इति प्रख्यातः मैसूरुराज्यस्य राजा बभूवेत्यब्रूम । तदा स बालः । दिवान इति मुख्यमन्त्री तस्मिन् काले प्रथते स्म । पूर्णय्य इति दिवानो राज्यभारं निर्वहति स्म । राज्ञा विद्याभ्यासः पण्डितवरण्यैः कारितः । देशभाषायां च देववाण्यां च वैदुष्यं राज्ञा लब्धम् । ततः स राज्यभारं स्वयम् अवहत् । कतिपतवर्षानन्तरं दुर्दैवाद्देशोऽवग्रहपीडितोऽभवत् । अनावृष्ठिकारणात् सस्यानि नष्टानि । दुर्भिक्षेण प्रजाः कष्टान्यनुभवन्ति स्म । तत्र तत्र विप्लवाः प्रादुरभवन् । इमां परिस्थितिम् अवलोक्य आंग्लाः मैसूरुराज्याधिकारं स्ववशीकृतवन्तः । राजा सौधे विराजते स्म । स स्वकालं देवताराधने काव्यादिरचनायां शास्त्रादिविनोदेषु च विनियुङ्क्ते स्म । बहवो ग्रन्थास्तदा रचिताः स्वयं राज्ञा, अन्यैश्च पण्डितैस्तत्प्रेरणया ।

राजा देशाटनं कुर्वाणः श्रेष्ठान् पण्डितान् कलाकारांश्च दृष्ट्वा तान् राजधानीम् आगन्तुं आह्वयति स्म । एवं मैसूरुनगरस्य संस्कृतिसम्पदा दिनेदिने वर्धते स्म । कदाचित् प्रभुरयं वीरशैवमतानुयायिनं महादेवशास्त्रिनामधेयं पण्डितं देशाटनवेलायां ददर्श । तन्मुखादस्खलितं निर्गतानि संस्कृतपद्यानि वेदवचनानि च शुश्राव । अतितमां प्रीतः कृष्णराजप्रभुस्तं राजधानीम् आगन्तुम् आजुहाव । प्रभोर्वचनं नोल्लङ्घनीयम् इति महादेवशास्त्री सपत्नीको मैसूरुनगरम् आजगाम । नगर्यां महादेवशास्त्रिणः सकलमनुकूलम् आसीत् । विदुषां सहवासः । राजसौधे पौरोहित्यम् । काव्यशास्त्रविनोदेन कालो गच्छति धीमताम् इति सुभाषितमनुसरन् स सुखेन कालं यापयति स्म । तत्र तस्य धर्मपत्नी सुदिने पुत्रमसूत । पुत्रस्य नामैकादशेऽहनि बसवप्पशास्त्रीति कृतम् ।

बसवप्पशास्त्रिणो जन्म क्रिस्तशके त्रिचत्वारिंशदुत्तराष्टादशशततमे १८४३ वर्षेऽभवत् । महादेवशास्त्री, तत्पत्नी बसवम्मा च शिशोर्लीलाः पश्यन्तौ आनन्दतुन्दिलौ आस्ताम् । कृष्णराजप्रभोरनुग्रहेण धनधान्यसमृद्धिरासीत् । किन्तु शिवो भक्तान् नितान्तं परीक्षते । बसवप्पशास्त्रिणो बाल्य एव महादेवशास्त्री दिवमगात् । बसवम्मा व्याकुला विह्वला चाभूत् । तदा करुणावरुणालयः श्रीकृष्णराजप्रभुस्तस्यै धैर्यं दत्वा बालकस्य विद्याभ्यासम् अनुवर्तयितुं व्यवस्थाम् अकरोत् ।

तदानीन्तने काले राजाश्रिताः गरलपुरीशशास्त्रिणः संस्कृतवैदुष्येऽप्रतिमाः आसन् । तषां कवितां श्रावं श्रावं राजा तुष्यति स्म । बसवप्पशास्त्रिणे शास्त्राणि बोधयितुं त एवार्हन्तीति निश्चित्य राजा तानेव तत्कर्मणि नियोजयामास । एवं बसवप्पशास्त्री श्रेष्ठं गुरुम् अलभत । गरलपुरीशशास्त्रिणः कालिदासादीनां महाकवीनां काव्यानि,नाटकानि,पाणिनीयं व्याकरणं चाबोधयन् । कन्नडभाषायाः काव्यानि व्याकरणं च बोधयितुं पण्डितमल्लप्पं प्रभुः न्ययुङ्क्त । स पण्डितवरेण्यः बसवप्पशास्त्रिणे कन्नडभाषायाः श्रेष्ठान् ग्रन्थान् अबोधयत् । प्रकृत्या प्रतिभाशाली बसवप्पशास्त्री विद्यां प्राप्य तेजसा व्यराजत । गरलपुरीशशास्त्रिणः बसवप्पशास्त्रिणं सुतनिर्विशेषं पोषयन्तः तस्मिन् कविताशक्तिं व्यकासयन् । मल्लप्पपण्डितस्य शिक्षणेन बसवप्पशास्त्री तत्र नैपुण्यमाप्नोत् । अष्टादश-वर्षवयस्येव कृष्णराजाभ्युदयाख्यं काव्यं तृतीयकृष्णराजप्रभोर्विषये रचयित्वा राज्ञो गुरुद्वयस्य च प्रशंसायाः पात्रम् अभवत् । कन्नडभाषायां तस्य शैली आदिपम्परचितं विक्रमार्जुनविजयं, रन्नकविरचितं साहसभीमविजयं च स्मारयति स्म । उभयभाषाविद्वान् इति कतिपयैरेव वर्षैः प्रथितोऽभवद्बसवप्पशास्त्री ।

तृतीयकृष्णराजभूपस्यानन्तरं श्रीचामराजवोडेयरः सिंहासनम् आरोहत् । तदा स बालकः । तस्य विद्याबोधनाय बसवप्पशास्त्री नियुक्तः । एवं स राजगुरुरभवत् । नूतनस्य राज्ञो बुद्धेरुन्मीलने स शक्तोऽभवच्च । श्रीयुतः चामराजः स्वशासनवेलायां प्राच्यकोशागारं (oriental library) स्थापयित्वा

भारतविद्याप्रसरे मुख्यं पात्रमवहत् । तदानीन्तनो मन्त्री दिवानः रङ्गाचार्यः श्रीबसवप्पशास्त्रिणो विद्वत्तया प्रभावितः कन्नडभाषायाम् उत्तमान् ग्रन्थान् रचयितुं, श्रेष्ठानि संस्कृतनाटकानि अनुवदितुं च प्रेरयामास । ततो बसवप्पशास्त्री ग्रन्थरचनां तदेकनिष्ठया प्रारभत । अत्र कन्नडभाषायाः छन्दसो विषये किञ्चिद्वक्तव्यम् । आदिकविना पम्पेन रन्नकविना च संस्कृते रूढानि कतिपयानि वृत्तान्युपयुक्तानि । किन्तु कन्नडभाषाया विशिष्टं छन्दः षट्पदीत्यभिधीयते । तत्र शरषट्पदी भामिनीषट्पदी वार्धकषट्पदीत्यादयो भेदाः सन्ति । विजयनगरसाम्राज्यवेलायां कुमारव्यासेन रचिता कर्नाटभारतमञ्जरी भामिनीषट्पद्यां विद्यते । लक्ष्मीशेन रचितं जैमिनिभारतं वार्धकषट्पद्यां वर्तते । एतत्सर्वमधीत्य लब्धोत्कर्षो बसवप्पशास्त्री सरस्वतीकैङ्कर्यं कर्तुं षट्पदीम् आदावाश्रयत् । सावित्रीचरित्रं नाम काव्यं स भामिनीषट्पद्यां न्यबध्नात् । अस्मिन् काव्ये सप्त सर्गास्सन्ति । पद्यानां संख्या चतुर्दशाधिकं त्रिशतम् । सरला भाषात्रोपयुक्ता । उदाहरणतया पद्यमेकं लिखामः –

एले नृपति निन्निष्ठवनु नां
तिळिदिरुवेनै केळु निन्नय
ललनेयुदरदोळोन्दु कन्यारत्नवुदिसुवुदु ।
सलिसिरुवेनी वरव मनदोळु
कळवळिसबेडेन्दु नुडिदा
बळिकलन्तर्धानवनु होन्दिदळु सावित्रि ॥

कन्नडभाषायां यो यो जानाति स सर्व एतत्काव्यं पठितुमर्हति । विना कष्टं तात्पर्यं वाचकैर्ज्ञायते । पतिव्रतामहिमवर्णनैवात्र मुख्या । सावित्र्यु-पाख्यानमाश्रित्य कथा कथिता । बसवप्पशास्त्रिणः प्रतिभा अङ्कुरावस्थायाम् आसीदस्य काव्यस्य रचनायाः वेलायाम् । विकासस्य चिह्नानि प्रकाममत्र दृश्यन्ते । दमयन्तीस्वयंवरम् इति चम्पूकृतिः कन्नडभाषायां बसवप्पशास्त्रिणा रचिता । अत्र भाषा प्रौढा । संस्कृतशब्दभूयिष्ठा वाणी पण्डितान् सुष्ठु आनन्दयति । पद्यानि नानावृत्तेषु रचितानि । गद्यानि चौजोगुणविलसितानि । गद्यस्यैकमुदाहरणं दीयतेऽस्माभिः–

'मत्तमा अखण्डमहीमण्डलेश्वरन् आखण्डवेतण्डशुण्डाप्रकाण्ड-निभदोर्दण्डमंडितचण्डतरकुण्डलीकृतकोदण्डकाण्डखण्डितरिपुमण्डलीशिरःपुण्डरीक-कलितताण्डवालोकनस्तब्धमार्तण्डनुम् अहमहमिकाभिनतसमस्तसामन्तमहीकान्त-मस्तकन्यस्तमकुटतटघटितमणिगणकान्तिसन्तानदन्तुरचरणोपान्तनुम् अप्रतिम-निजभुजप्रतापप्रवाळस्तम्भसमुत्तम्भितविपुळविमळकीर्तिमुक्तामयकायमानच्छाया-शीतलीकृतसकलभूतळनुम् ....।'

दमयन्त्याः कथा पूर्वसूरिभिर्बहुभिः क्षुण्णा । तत्र त्रिविक्रमस्य संस्कृतनलचम्प्वाः शैलीं बसवप्पशास्त्री अनुसरतीति मन्यामहे ।

ग्रन्थादौ कविः स्वपोषकस्य तृतीयकृष्णराजस्य वंशं वर्णयति । चामराजभूपालस्य गुणगणांश्च कथयति । पूर्वकन्नडकवीनां मध्ये वीरशैवमतानुयायिनां हरिहर-राघवाङ्क-षडक्षरिदेवान् उल्लिखति च । ग्रन्थेऽस्मिन् चत्वारः आश्वासाः सन्ति । भैमीपरिणयपर्यन्तं नलचरितं चम्पूशैल्या निरूपितम् । अन्ते मङ्गलपद्यम् इत्थं वर्तते -

अनघं शक्तित्रयं संगळिसे नेरेये सप्ताङ्गमं सांगमन्त्रा-
नुनयं कय्गण्मे सामादिगळळनडे साम्राज्यमं ताळ्दशेषा ।
वनिभृन्मौळिस्फुरच्छासननेनुतेसद्धर्मदिंदं प्रजापा-
लनेगैदं सत्कळत्रात्मजयुतननिशं नैषधक्ष्मामहेन्द्रम् ।।

रेणुकविजयं नामापूर्णं चम्पूकाव्यमपि बसवप्पशास्त्रिरचितमुपलभ्यते । अत्र चतुष्पञ्चाशदधिकं शतं पद्यानि दृश्यन्ते । कवेरुद्देशस्तु बृहतः चम्पूकाव्यस्य रचना । शिवावतारत्वेन गण्यमानस्य रेणुकाचार्यस्य चरितं वर्णयितुकामः कविः कस्मान्मध्ये विरत इति न जानीमहे । नानाच्छन्दोबद्धानि पद्यानि कानिचिद् गद्यानि च हृद्यानि सन्ति । कृतिरसम्पूर्णेति वयं खिद्यामः ।

शङ्करशतकं नाम स्तोत्रं बसवप्पशास्त्रिणा रचितं शिवं स्तोतुम् । कन्द स्कन्धक नाम्नि च्छन्दसि निबद्धानि पद्यानि अत्र विद्यन्ते । इदमपि काव्यम् असम्पूर्णमेव लभ्यते । लब्धेष्वपि पद्येषु तत्र तत्र पदानि लुप्तानि ।

इतः परं बसवप्पशास्त्रिभिः कृतानाम् अनुवादानां समीक्षां कुर्महे । एकोनविंशे शतके, विंशशतकस्यादिभागे चानुवादस्यातीवावश्यकता आसीत् । तत्रापि नाटकानाम् । कन्नडभाषायां तदा रङ्गप्रयोगयोग्यानि नाटकानि विरलान्यासन् । कलारसिको राजा संस्कृतनाटकानां कन्नडानुवादं कर्तुं बसवप्पशास्त्रिणम् आदिशत् । तदनुसारेण श्रेष्ठा अनुवादाः कृताः, तेषां रङ्गे प्रयोगश्च कृतः । पण्डिताः पामराश्च नाटकानि दर्शं दर्शं तृप्यन्ति स्म ।

अभिज्ञानशाकुन्तलनाटकं संस्कृतनाटकसाहित्ये शिरोमणीयते । तदनूदितं श्रीबसवप्पशास्त्रिवर्येण । कर्णाटकशाकुन्तलनाटकमिति तत्प्रसिद्धम् । दिवानस्य (मुख्यमन्त्रिणः) रङ्गाचार्यमहोदयस्याध्यक्ष्ये मिलितायां सभायां स्वयं बसवप्पशास्त्री तन्नाटकं विद्वन्मनोरञ्जकविधया अवाचयत् । कर्णानन्दमनुभूय दिवानरङ्गाचार्य एव विद्वदनुमोदनां प्रकटीकर्तुं कर्णाटककालिदास इति बिरुदं बसवप्पशास्त्रिणे प्रादात् । उभयभाषाविपश्चिद्भिः कर्तव्यं किम् इत्येवं क्रियया बसवप्पशास्त्रिणा दर्शितम् । ततः कालिदासस्य विक्रमोर्वशीयं च तेन कन्नड भाषायाम् अनूदितम् ।

नाटके भवभूतिर्वा वयं वा वयमेव वा ।
उत्तरे रामचरिते भवभूतिर्विशिष्यते ।।

इति पद्यं सर्वविदितम् । भवभूतेः श्रेष्ठं नाटकं करुणरसपूर्णं सर्वजनप्रियम् । तदपि बसवप्पशास्त्रिणा कन्नडभाषया अनूदितम् । तत्रोत्तररामचरिते मूलेन साकं कानिचन रागतालबद्धानि गीतान्यपि बसवप्पशास्त्रिणा योजितानि । तदानीन्तननाटकेषु सङ्गीतस्यैव प्राधान्यमासीदिति तत्र कारणम् । नाटकान्ते बसवप्पशास्त्रिणा चामराजनृपतिः स्मृतः । यथा –

वरगुणयुत चाममही–
श्वरनिन्दाज्ञप्तनागि तां संस्कृतदु
त्तररामचरित्रमनिळे–
यरियल् बसवप्पशास्त्रि कान्नडिसिर्पम् ।।

श्रीहर्षस्य **रत्नावली** च बसवप्पशास्त्रिणा हृदयङ्गमशैल्या अनूदिता । अत्रापि मूलेन साकं गीतान्यपि रचितानि । अन्ते स्वनामयुतं पद्यं च बसवप्पशास्त्रिणा रचितम् ।

नुतगुणयुतचाममही–
पति निरविसे बसवशास्त्रि विरचिसिदं सं ।
स्कृतरत्नावळियं स–
न्नुत कन्नडदोळेने पोगळ्दु नलियदरोळरे ।।

आर्यक्षेमीश्वरविरचितं चण्डकौशिकं नाम नाटकमपि लोकप्रसिद्धम् । अस्मिन् हरिश्चन्द्रस्य चरितमेव वस्तु । हरिश्चन्द्रस्य कथा प्रसिद्धा । जनानां तत्राभिरुचिरधिका । तस्माद् बसवप्पशास्त्री चण्डकौशिकमप्यनूदितवान् इति कथनमुचितमेव । किन्तु दुर्दैवादस्य नाटकस्यानुवादो न समापितो बसवप्पशास्त्रिणा, मध्य एव स शिवपादाम्बुजयोर्लीनोऽभवत् ।

अस्मिन् कालेऽळसिङ्गराचार्यो नाम श्रीवैष्णवकविरासीत् । कन्नड-चण्डकौशिकनाटकम् अपरिसमाप्तं दृष्ट्वा व्यथितः सोऽनुवादम् अपूरयत् । एतच्च ग्रन्थान्ते दृश्यमानात् पद्याज्ज्ञायते ।

वरगुणयुतचाममही –
श्वरनास्थानदोळे नेगळ्द बसवकवीन्द्रम् ।
विरचिसुते पञ्चमाङ्कं
बरमीकाव्यमने परमपदमं सार्दम् ।।

कृतियिदु नडुवोळ् विघ्न –
प्रतिहतमेनिसिर्दुदेन्दु चिन्तिसुतं पं ।
डितरोल्दु बेससलवरा –
णतियिन्दळसिङ्गरार्यनुळिदुदनुसिर्दम् ।।

एवं च चण्डकौशिकनाटकस्य आदिमाः चत्वारोऽङ्काः बसवप्पशास्त्रिणा रचिताः । पञ्चमाङ्कः अळसिङ्गराचार्येण रचितः इति ज्ञायते । अमुमेव पञ्चमाङ्कं पुनः विद्वांसः एम्.जि.नञ्जुण्डाराध्याश्च व्यरचयन् ।

आंग्लभाषायां शेक्स्पियर्नामा कविर्जगद्विख्यातः। तेन बहूनि नाटकानि विरचितानि । तषां ख्यातिर्भारतवर्षेऽपि प्रसृता। तस्य महाकवेर्नाटकेषु किमपि कन्नडभाषायामनुवादितव्यं, तस्य रङ्गप्रदर्शनं चायोजनीयम्, तस्य रसः प्रजाभिरास्वादनीयः इति सुब्बरायाख्यो बसवप्पशास्त्रिणं प्रैरयत् । बसवप्पशास्त्री तु आंग्लभाषां न जानाति स्म । सुब्बरायः मूलं पठित्वा विवृणोति स्म । ततो बसवप्पशास्त्री प्रायततानुवादे ।

शेक्सपियर्महाशयस्य 'आथलो' नामकस्य नाटकस्य नाम शूरसेनचरितमिति कृत्वा बसवप्पशास्त्री अनुवादं व्यरचयत । ग्रन्थारम्भात् प्राग्दृश्यमानानि पद्यानि विषयमिमं विशदीकुर्वन्ति ।

भुवनख्यातांग्लेय सु–
कवियेनिसिद शेक्सपियरिं विरचितमा ।
दवुगळोळुत्तमनाटक
मवितथमीवोथेलोवेन्दु नुडिदपरल्ते ।।

वरनाटकमनिदं सु–
ब्बरानयतिललितशैलियोळे कन्नडदोळ्
विरचिप कुतुकदे कविशे–
खरनादा बसवशास्त्रियिं बरयसिदम् ।।

विदितमिदु शूरसेना–
ख्यदे बसवकवीन्द्रनिन्दे रचितं ताना ।
दुदु सङ्गीतसुसाहि–
त्यदिन्दमोडगूडि जनके जनिसुगे मुददिम् ।।

कृतियनिदं स्वीकरिसै
नुतगुणयुत कृष्णनृपति दयेयिं भवदा ।
श्रित रामचन्द्रराया
र्पितमं विद्वज्जनाळि हृदयङ्गममम् ।।

शूरसेनचरित्राख्यमिदं नाटकं तृतीयकृष्णराजस्य काले रचितम् इति च उपरितनपद्यैर्ज्ञायते । एतच्च नाटकं रङ्गे प्रदर्शितमभवत् । यदि शेक्स्पियर्कविरेव

कन्नडदेशे जन्म लब्ध्वा नाटकमिदम् अरचयिष्यत् तदापि इतः सुन्दरतरं नाभविष्यदिति जनाः नाटकं वीक्ष्य बभणुः इति ज्ञायते ।

शूरसेनचरित्रेऽपि कन्दपद्यानि विद्यन्ते । रागनिबद्धानि गीतान्यपि अधोऽङ्कणे दत्तानि । संगीतप्रिया नाटकं रोचयन्तु इति दृष्ट्या बसवप्पशास्त्रिभिरिदं नाटकं रचितम् । क्रौञ्चद्वीपः, सिंहलद्वीपः इति कथास्थानानि निर्दिष्टानि । पात्राणां नामधेयानि देवदत्तविजयध्वजादीनि । अतः पठनवेलायामिदमनूदितं नाटकमिति नैव भाति ।

भर्तुहरिशतकत्रयं च बसवप्पशास्त्रिणा अनूदितम् । रावबहादूर् अम्बिल नरसिंहय्यङ्गार्यः अस्यानुवादस्य प्रेरकः । एतच्च ग्रन्थकारेण स्वयमभिहितम् ।

नुतगुणचाममहीपति–
मतिसचिवनृसिंहवर्यनुत्साहिसे सं–
स्कृत भर्तृहरिसुभाषित
कृतियं बसवप्पशास्त्रि कन्नडिसिदम् ।।

मुन्निन संस्कृतकृतिगिदु
कन्नडियेने कन्नडिप्पुदुचितं कविगळ् ।
एन्नरिवुळ्ळनितरिदां
कन्नडिसिर्पं गुणज्ञरभिमतिपुदिदम् ।।

१८९० तमे वर्षे कैश्चित् पण्डितैः कृतान् आक्षेपान् निरसितुं बसवप्पशास्त्री लेखमेकं विमर्शेय ओरेगल्लु (विमर्शनिकषः) इत्याख्यं प्राकटयत् । भर्तृहरिनीतिशतककन्नडानुवादः परीक्षायै तदा निर्दिष्टा इति ज्ञायते । अनुवादस्य निर्दोषत्वं बसवप्पशास्त्रिलेखे स्पष्टीकृतम् । बसवप्पशास्त्रिणः व्याकरण ज्ञानप्रावीण्यं तत्र द्रष्टुं शक्यते । नीतिसारसङ्ग्रहः इति एका कृतिरपि पद्यमयी बसवप्पशास्त्रिणा विरचिता । अस्याः कृतरपि प्ररका रावबहादूर् अम्बिल नरसिंहय्यङ्गार्य एवति ज्ञायते ।

नुतगुण चाममहीपति
मतिसचिवनृसिंहवर्यनुत्साहिसे स–
न्नुत नीतिसारसङ्ग्रह
कृतियं बसवप्पशास्त्रि तां विरचिसिदम् ।

अस्मिन् ग्रन्थे विद्वत्पद्धतिः विद्यापद्धतिः, धर्मः, दैवं, शान्तिः, गृहस्थाश्रमः, सुजनपद्धतिः, कुलस्त्रीपद्धतिः, नीतिपद्धतिः इति विभागाः सन्ति । द्वाविंशत्युत्तरशतसंख्याकानि पद्यानि कन्दवृत्ते निबद्धानि सन्ति । एषापि बसवप्पशास्त्रिणः अनुवादकृतिरिति भाति । संस्कृतभाषायाः सुभाषितानि कन्नडभाषया अनूदितानीति वक्तुं शक्यते उभयभाषासाहित्यविद्भिः । उदाहरणाय नीतिसारसङ्ग्रहस्य प्रथमपद्यं गृह्यताम्–

सकलकलावित्सुकवि–
प्रकरदे नृपसभे विराजिसुगुमल्लदे स–
न्मुकुरस्तम्भवितान
प्रकटितचित्रंगळिन्ददें रञ्जिकुमे ।।

एतत् सभारञ्जनशतकस्य पद्यस्यैकस्यानुवादः । तत्पद्यमिदम्–

षड्दर्शनीपरिज्ञानमण्डितैरिव पण्डितैः ।
स्तम्भैश्चित्रैर्वितानैश्च सभा किमवभासते ।।

एवमन्येषामपि पद्यानां मूलसंस्कृतपद्यानि तत्र तत्र दृश्यन्ते । बसवप्पशास्त्रिणः कन्नडपद्यम्–

उदिसुगे पलवुं भास्कर
रुदिसुगे पलरुं कठोरपीयूषकरर् ।
सदसद्विवेकपर को–
विदवाक्यदिनल्लदळियदन्तस्थतमम् ।।

मूलसंस्कृतपद्यम्–

उद्यन्तु शतमादित्याः उद्यन्तु शतमिन्दवः ।
न विना विदुषां वाक्यैर्नश्यत्यन्तः स्थितं तमः ।।

एवमन्यान्यपि पद्यानि परीक्षणीयानि ।

बसवप्पशास्त्रिभिर्विरचितं गीतमकं मैसूरुमहाराजस्यातीवप्रियमासीत् । राज्यगीतमिति तदङ्गीकृतमासीत् । राज्यस्य समारम्भेषु वाद्यैः सह तदगीयत । शालासु च नित्यं प्रार्थनावेलायां सर्वैः छात्रैस्तद् गीयते स्म । तदत्र दीयते–

कायौ श्रीगौरि करुणालहरि–
तायजाक्षि शङ्करीश्वरि ।।
वैमानिकभामार्चितकोमलतरपादे ।
सीमातिगभूमास्पदकामितवरफलदे ।।
शुम्भादिमदाम्भोनिधिकुम्भजनिभे देवि ।
जम्भाहितसम्भाविते शाम्भवि शुभवीये ।।
क्ष्यामालके चामुण्डिके सोमकुलज चाम ।
नामाङ्कितभूमीन्द्रललामन मुददे ।।
कायौ श्रीगौरि ।

एवं कन्नडभाषासाहित्याय बसवप्पशास्त्री अनितरसाधारणम् योगदानं प्रादात् । तस्य प्रज्ञा च प्रतिभा चाद्भुतासीदिति निश्चप्रचम् । संस्कृतसाहित्य–ज्ञानबलेन बसवप्पशास्त्री कन्नडभाषायां कृतीः बह्वीर्व्यरचयत्, अनुवादान् बहून् कृत्वा राजगौरवं प्राप्नोत् । तदानीन्तनकाले आस्थानविद्वत्पदवी सर्वैः पण्डितैः काम्यते स्म । बसवप्पशास्त्री तया भूषितो नितरां शुशुभे ।

***

संस्कृतकृतयः

बसवप्पशास्त्रिणा पञ्च संस्कृतकृतयो निरमीयन्त । तत्र तस्य भाषासौष्ठवं कविताकौशलं च विद्योतते । शब्दालङ्काराश्च तत्र संमिलन्ति ।

अम्बाषोडशमञ्जरी

इयं स्तुतिः द्रुतविलम्बितवृत्ते रचिता । माधुर्यगुणाऽत्र विराजते । ललितैर्मधुरैः पदैराकर्षतीयं मञ्जरी रसिकानां मनांसि । आस्वादयन्तु विद्वांसः ।

हरमनोरमनापमिताकृते
परमया रमया परिपूजिते ।
जननि शुम्भनिशुम्भहरे सुखं
दिश शिवे शशिवेष्टितमस्तके ।।

रसिकता सिकता किल यद्भव–
च्चरणिता रणतो विशतः कवेः ।

तदयि ते दयिते परमेशितुः
जननि दाननिदानपदं स्तुमः ।।

सुरमणीरमणीयनखप्रभा-
रुणकरेण करेणुमुखप्रसूः ।
अमितकामितकामदुघा भवेत्
हरवधूरवधूतभवाद्य नः ।।

अपि कया पिकयाचितकण्ठया
शिवपुषा वपुषा लवलीकया ।
अगजया गजयानविलासया
सकुशलाः कुशलाल्पधिया वयम् ।।

अविरतं विरतं कुनृपाश्रयात्
सपदि ते पदि तेन कृताश्रयम् ।
अवशिवे वशिवेदिनि मां श्रिता-
वनपरे न परे मम पालकाः ।।

सरससारससाधुलतामलिः
श्रयति कां यतिकाङ्क्ष्यपदे जनः ।
जगति कागतिकाम्ब विना त्वया
वद शनैर्दशनैर्धवलं वचः ।।

तव रदा वरदात्रि पविश्रियः
सकलहं कलहंसकुलैर्गतम् ।
त्रिवलया वलयोर्मिनिभा घन-
च्छविकचो विकचोत्पलदुर्जयः ।।

सकमलं कमलं मुखमम्ब तेऽ-
धरमहोऽरमहो जितविद्रुमम् ।
दरसमा रसमानगलस्थली-
रसदृशा सदृशा न मयेक्षिताः ।।

चरणतो रणतो मणिनूपुरै-
रिह सितैर्हसितैर्लसता मुखात् ।

नयनताऽयनताऽम्ब कृपानिधे-
रभयदासि यदासितगात्रि नः ॥

तव दयावदयाद्रिसुते पठ-
दुपरि मेऽपरिमेयगुणे यदि ।
धनंमदानमदात्मवतः कुतोऽ-
वंनिपतेर्निपतेत् किमु मन्मनः ॥

पुलकदम्भकदम्बवतंसितं
रतिवशङ्करशङ्करचुम्बितम् ।
तव मरन्दमरं दमयत् स्मितं
वदनमस्तु नमःस्तुतिभाजनम् ॥

हृदय या दयया भुवि मूकम-
प्यजनिभं जनिभङ्गचणाकरोत् ।
विनमतां नम तां वरदां यतो
नयति सा यतिसाध्यसुखं शिवा ॥

कमलकोमलकोविदवाक् शुका-
स्पदशया दशया तुलितेन्द्रिया ।
सकलया कलया च नियोजये-
दरमुदारमुदामुमुमा जनम् ॥

सरति भारति भासुरचक्रराट्
भुवनपावनपादपयोरुहा ।
अवनतावनतातिरगात्मजा-
च्युतनुता तनुतान्मया मङ्गलम् ॥

मधुरसाधुरसाललसद्गिरः
पिकवयः कवयश्च शिवप्रिये ।
जननुता ननु तावकपदद्वयी
भजनभाजनभावुकसूक्तयः ॥

हृदय ते दयतेऽपि सकृत् स्मृतिं
रचयते च यतेरपि दुर्गमा ।

रहसि तां हसिताङ्कमुखीं श्रियै
जप घनापघनाम् अघकन्यकाम् ।।

जितवता तव तामस्रसं शर
द्धिमकरं मकरन्दरसाज्ज्वलम् ।
हसितवासितवाग् वदनेन मे
वरमुदारमुदार्पितमम्बिके ।।

दृशा जितोत्केसरसारसारसा
स्वयानलीलाभिरसारसारसा ।
नता कुचोद्भास्युरसाऽरसारसा
शिवावतान्मां तरसा रसारसा ।।

एवं चात्राष्टादश पद्यानि विद्यन्ते । सप्तदश द्रुतविलम्बितवृत्तनिबद्धानि । अन्तिमं पद्यं तु उपेन्द्रवज्रवृत्तनिबद्धम् । भक्तिरेवात्र मुख्या । यमकाख्यस्य शब्दालङ्कारस्य योजना कविना सुष्ठु कृता ।

***

आर्याशतकमिति कृतिरपि बसवप्पशास्त्रिणः अनुपमं पाण्डित्यं द्योतयति । यद्यपि शतकमिति नाम, तथापि कृतौ षष्ट्यधिकं शतं पद्यानि विद्योतन्ते । एकानविंशे शतके कर्णाटकदेशे महाकविरयमासीदिति अभिमानास्पदम् । अत्र प्रथमं पद्यं वसन्ततिलकच्छन्दसि विद्यते । ततः आर्याछन्दसि निबद्धानि सप्तपञ्चाशदुत्तरशतं पद्यानि सन्ति । तत एकं पद्यं शिखरिणीवृत्ते निबद्धमस्ति । अन्तिमं पद्यं च मन्दाक्रान्ताख्यवृत्ते विरचितं विलसति ।

आर्याशतकम्

लक्ष्मीवशीकरणचूर्णसहोदराणि
त्वत्पादपङ्कजरजांसि शिवे जयन्ति ।
यानि प्रणाममिलितानि नृणां ललाटे
लुम्पन्ति धातृलिखितानि दुरक्षराणि ।।१।।

(अत्र शिवे इति सम्बोधनम् । हे पार्वतीत्यर्थः ।)

आर्या कुर्यात् कृपया भार्या गिरिशस्य मां कविसभार्यम् ।
आर्याभिनन्द्यचर्याहार्यसुता भजकसुरलता ललिता ।।२।।

(अत्र कविसभार्यमित्यस्य कविसभायां पूज्यमित्यर्थः
अहार्यः पर्वतः, तस्य सुता पुत्री । भजकानां भक्तानां सुरलता कल्पवल्ली ।)

निगमान्तवनमयूरी नीलग्रीवास्यसितकरचकोरी ।
नीहारगिरिकुमारी नित्यानन्दं तनोतु मे गौरी ।।३।।

(निगमान्ताः वेदान्ता एव वनं, तत्र मयूरी । नीलग्रीवः शिवः, तदास्यं तन्मुखमेव सितकरश्चन्द्रः, तस्य चकोरी । नीहारगिरिः हिमशैलः । रूपकालङ्कारः ।)

कुल्या कापि कृपायाः कल्या भुवनावने श्रितजनानाम् ।
तुल्या कल्पकवल्ल्या कल्याणपरम्परां विधत्तां मे ।।४।।

(कुल्या सरित् । कल्या समर्था । भुवनावने जगद्रक्षणे ।)

तुहिनाचलसञ्जाता सविशाखा समाश्रितस्थाणुः ।
काचिदपर्णापि लता कांक्षितफलमास्मकीनमुपसूते ।।५।।

(पर्णरहिता लता फलं सूते इति विरोधाभासः । आस्मकीनमिति पदं चिन्त्यम् । आस्माकीनमिति साधु ।)

दयिते गिरिशस्य हठादयि ते महिमानुवर्णनं कर्तुम् ।
मुखरा वयं त्वशक्ता मुखराजत्स्मितलवे प्रसीद शिवे ।।६।।

आस्तां मूककवित्वप्रस्तावो देवि तव कृपापात्रम् ।
पाषाणोऽपि कवित्वं पठेदतः कलय मयि दयां मातः ।।७।।

प्रसरति मुखादयत्नं यदनुग्रहतः कवित्वमतिनूत्नम् ।
पुंसामाशु चिरत्नं तदाश्रये किमपि देवतारत्नम् ।।८।।

(नूत्नं नूतनम् । चिरत्नं चिरन्तनम् । आश्रये आश्रयामि ।)

महती श्रुतिरपि यत्ते महिमानं चकितचकितमभिधत्ते ।
तं कथमप्यभिधास्ये शङ्करि मयि कुरु कृपां सुरोपास्ये ।।९।।

(चकितचकितं सभयम् । अभिधास्ये वदिष्यामि ।
सुरापास्ये इति सम्बोधनम् । देवैः पूज्ये इति भावः ।)

रङ्कुशफरेक्षणेऽम्ब निरङ्कुशफणितिप्रसूननिकरैस्त्वाम् ।
शङ्करि समर्चयाम्यनिशं करिमुखजननि कलय मयि करुणाम् ।।१०।।

(रङ्कुः हरिणविशेषः । शफरो मीनः । मृगेक्षणे, मीनाक्षीति सम्बोधनम् । प्रसूनं पुष्पम् । करिमुखजननि गणेशमातः । अत्र कन्नडकाव्यानुसारेण यतिभङ्गः सहनीयः ।)

मूकोऽपि सरसफणितिचमूकाऽभवदम्ब जगति कविराजः ।
भवतः प्रसादलववैभवतः कुरु मां च निजकृपापात्रम् ।।११।।

(सरसाः फणितय एव चम्वो यस्य स तथोक्तः । अत्र अम्बां प्रति 'भवत्याः' इति वक्तव्ये भवतः इति प्रयोगो न साधुः । कवेरनवधानस्योदाहरणमिदम् ।)

किं करवाणि न चेद् यदि किङ्करवात्सल्यमम्ब ते नूनम् ।
कुरु मयि कटाक्षवीक्षाङ्कुरमयि शङ्करि जितत्रिलोकोऽस्मि ।।१२।।

(वीक्षाङ्कुरम् + अयि इति च्छेदः ।)

धन्यो हि सकलकविमूर्धन्योऽवन्यामिति ध्रुवं चित्ते ।
मन्ये महीध्रपरिवृढकन्ये यत् त्वत्प्रसादपात्रमहम् ।।१३।।

(महीध्रपरिवृढः पर्वतराजः, तस्य कन्या पुत्री ।)

गौरी नमतां मरुतां गौरीशमनोवनान्तरमयूरी ।
दूरीकुर्याच्छ्रुतिसिन्दूरीकृतचरणधूलिरघपालिम् ।।१४।।

(गौर्याः चरणधूलिः श्रुतिभिः सिन्दूरमिव शिरसि धार्यत इति तात्पर्यम् । अघानां पापानां पालिः पङ्क्तिः ।)

सुवितर मे विनतरमे शुभतरमेधामुमे मराळगमे ।
अयि परमेनोपरमेत: परमेऽव त्वदङ्घ्रिनुतिनिगमे ।।१५।।

स्वर्गापवर्गदात्री भर्गाङ्कगता तटिल्लतागात्री ।
दुर्गतजनैकधात्री दुर्गा मां पातु दुःखगिरिभेत्री ।।१६।।

(अपवर्गो मोक्ष: । भर्गस्य शिवस्य अङ्के गता ।
तटिल्लता विद्युल्लता । धात्री जननी ।)

दरहसितसुन्दरमुखी परकण्ठी मन्दरप्रभोरोजा ।
दरहृत् पायादरमावरता लम्बादरप्रसूरस्मान् ।।१७।।

(उरोजौ स्तनौ । मन्दरसमानस्तनीत्यर्थ: । दरं भयं हरतीति दरहृत् ।)

शरदेणलक्ष्ममुखि नरशरदे नवकुन्दकुसुमकोशरदे ।
नरदेवविनुत्यपदे वरदे परदेवते नमोऽद्रिसुते ।।१८।।

(एणलक्ष्मा मृगाङ्क: । शरच्चन्द्रमुखि इत्यर्थ: । नराय अर्जुनाय शरं दत्तवती नरशरदा । तत्सम्बुद्धिः नरशरदे । कुन्दकुसुमकोश: मल्लिकाकोरक: । तद्वत् रदा: दन्ता: यस्या: सा, तत्सम्बुद्धिः ।)

नवनीपवनीविहरणहृदया सदयाशया शिवाङ्कशया ।
करुणावरुणावसथं तरुणी तरणीन्दुशिखिदृश: पातु ।।१९।।

(वरुणावसथं समुद्रः । तरणीन्दुशिखदृश: सूर्यचन्द्राग्निनेत्रस्य शिवस्य तरुणी भार्या ।)

चिन्मुद्राङ्ककरा काचिन्मुद्रा राजमानसद्धृदया ।
सदया पायात् कृपया सदया बाला स्मरारिवरलोला ।।२०।।

शुकशाबकरा नवकिंशुकांशुका धृतहिमांशुकान्तिरपि ।
शुकमुख्यनुता माम् आशुकविं तन्यादहार्यपतिकन्या ।।२१।।

(शाब: अर्भक: । तं करे धृतवतीति भाव: । नवकिंशुकांशुका अरुणवस्त्रा । शुकमुख्यै: शुकमुनिप्रभृतिभि: । नुता स्तुता । तन्यात् तनोतु । आशीर्लिङ् । अहार्य: पर्वत: ।)

सलयां गीतिं पाणिकिसलयाङ्गुलिभिर्मणिविपञ्च्याम् ।
कलयामि वादयन्तीं कलया मिलितात्मशिरसममृतांशोः ।।२२।।

(मणिविपञ्ची रत्नवीणा । कलयामि भावयामि ।
अमृतांशोः चन्द्रस्य ।)

कलयाङ्कितनिजपाणिकिसलयाङ्गुलिभिर्मुहुर्मणिविपञ्च्याम् ।
सलयां गीतिं मधुरां कलयन्तीमम्ब मनसि कलये त्वाम् ।।२३।।

कमला वागपि तव पदकमलाश्रयिणो जनस्य गुहजननि ।
चेटीभवतः सितकरकाटीरार्धाङ्गि संश्रयेऽतस्त्वाम् ।।२४।।

(कमला लक्ष्मीः । वाक् सरस्वती । गुहजननि पार्वति ।
चेटीभवतः किङ्करीभवतः। सितकरकोटीरः चन्द्रशेखरः । तस्यार्धाङ्गी भार्या । संश्रये आश्रयामि ।)

शम्बकरमणिविडम्बा लम्बोदरमातृका सदालम्बा ।
अम्बा मे मतिजडताजम्बालं क्षालयतु कृपाम्भोभिः ।।२५।।

(जम्बालं पङ्कम्,कृपाम्भोभिः करुणाजलैः क्षालयतु ।
जाड्यमेव जम्बालमिति रूपकम् ।)

शरणागतमन्दाराः करुणोदारा विनम्रबृन्दाराः ।
दनुजवितानविदारा दयालवो मयि भवन्तु भवदाराः ।।२६।।

(बृन्दाराः देवताः । भवदाराः शिवपत्नी । दाराः पुंसि च भूम्नयेव इति बहुवचनम् । दनुजवितानस्य राक्षसवृन्दस्य विदारा नाशकाः।)

कलये त्वां मुनिमानसनिलये विलयेऽपि निश्चलां विमलाम्।
नादमयीं बिन्दुमयीं कलामयीं श्रेयसेऽहमयि देवि ।।२७।।

(विलयेऽपि प्रलयेऽपि निश्चलां भङ्गरहिताम् ।)

वीक्षे कदान्धकारातिसङ्गतां पश्यतोहरस्येष्टाम् ।
अवतंसिताब्जकलिकां बहुशोभां कालरात्रिमम्ब त्वाम् ।।२८।।

(अन्धकारातिः शिवः । अवतंसः कर्णभूषा । कलिका कोरकः ।)

करुणारसैकपात्रं परितोषिततुहिनगात्रमतिमात्रम् ।
तरुणेन्दुधरकलत्रं तनुतां मां द्रुतमरोगदृढगात्रम्।।२९।।

(तुहिनगात्रः हिमगिरिः । तरुणेन्दुधरकलत्रं शिवपत्नी ।
तनुतां करोतु । गात्रं शरीरम् ।)

शार्वं सुखसर्वस्वं पार्वतमैश्वर्यमाङ्गजं भाग्यम् ।
आस्तां दृशोः पुरस्तादाश्रितसंकल्पकल्पकवनं नः ।।३०।।

(शार्वं शिवसम्बन्धि । पार्वतं पर्वतसम्बन्धि । आङ्गजं मन्मथसम्बन्धि । कल्पकवनं कल्पवृक्षाद्यानम् । अत्र मालारूपकालङ्कारः ।)

करवै नमांसि रविहिमकरवैश्वानरदृगङ्कवासिनि ते ।
कुरु मयि तावकवीक्षाङ्कुरमयि शङ्करि कृपामृताकलितम्।।३१।।

(रविः सूर्यः, हिमकरश्चन्द्रः, वैश्वानरोऽग्निः, एते यस्य दृशा नयनानि स तथोक्तः । त्रिलोचन इत्यर्थः । तस्याङ्के वसति या तत्सम्बोधनम् ।)

दुर्गापि सुभक्तिमतां सुगमापणापि वृषभपतिपर्णा ।
बालापि परं श्यामा सोमा मामवतु शेखरितसोमा ।।३२।।

(अत्र विरोधाभासालङ्कारः स्पष्टः । सोमा=सा+उमा
शेखरितसोमा चन्द्रं शिरसि आभरणीकृतवती ।)

शशिवदना शान्तिधनाशयसदना शरधुताशरविताना ।
शतपत्रायतनयना शर्वाङ्कपरासनास्तु शरणं नः ।।३३।।

(शान्तिर्धनं येषां ते शान्तिधनाः, तेषामाशयानां सदनं गृहं या सा । शरेण धुतानि निर्धूतानि आशराणां राक्षसानां वितानानि यया सा ।)

रमया वाण्या च नतक्रमया त्रैलोक्यरक्षणक्षमया ।
उमया निरवधिकानन्दमया वयमखिलदेवतोत्तमया ।।३४।।

(नतौ नमस्कृतौ क्रमौ पादौ यस्याः सा । त्रयो लोका एव त्रैलोक्यम् ।)

जितयातुधानशतया नुतया श्रुतिभिस्तुषारगिरिसुतया ।
धृतयामवतीहितया गतिमन्तो ललितया तयाद्य वयम् ।।३५।।

(यातुधानानां रक्षसां शतं यया जितं तया जितयातुधानशतया । यामवती रात्रिः, तस्या हितश्चन्द्रः । धृतो यामवतीहिता यया तया ।)

जीवतुरङ्गजरिपोः सेवातुरवाग्रमादिशक्तिगणा ।
या वातुलागमनुता सैवातुलसौख्यदायिकास्माकम् ।।३६।।

(अङ्गजरिपोः मन्मथशत्रोः शिवस्य जीवातुर्जीवनौषधम् ।
नमदमरीजनकबरीसुमनिबिरीसालिजालवाचालम् ।)

हिमगिरिपुत्रि भवत्पदकमलं विमलयतु मामकं चेतः ।।३७।।

(कबरी केशपाशः । सुमं पुष्पम् । निबिरीसं निबिडं सान्द्रमिति यावत् । अलिजालं भ्रमरसमूहः । वाचालं शब्दायमानम् ।)

पुरुषार्थान् वितरतु मे पुरमथनपुरन्ध्रि ते पदाब्जयुगम् ।
पुरुषोत्तमपद्मासनपुरुहूतपुरोगसुरशिरोधार्यम् ।।३८।।

(पुरमथनस्य शिवस्य, पुरन्ध्री स्त्री पार्वती । तत्सम्बुद्धिः ।)

कमलंकरोति तव पदकमलं नखमणिभिरम्बिके यस्य ।
कमला वागपि लोके कमलाघवपदमुमे समाश्रयताम् ।।३९।।

(कं शिरः, अलंकरोति विभूषयति । कम् अलाघवपदम् इति च्छेदः ।)

पादपरागास्ते सुरपादपरागाढ्यपल्लवनिभाङ्घ्रे ।
वरदा राजन्तां भवनरदारस्विनाऽस्य नतमूर्ध्नि ।।४०।।

(पादयोः परागाः रेणवः । सुरपादपः कल्पवृक्षः । तस्य रागाढ्यः रक्तवर्णपूर्णः यः पल्लवः किसलयं, तन्निभाङ्घ्रे तत्समानपादे इति सम्बोधनम् । उत्तरार्धं न स्पष्टम् ।)

अम्ब तवाङ्घ्रिपरागान् वहन्ति ये मूर्ध्नि ते स्युरपरागाः ।
इत्यन्तरङ्गरङ्गे नृत्यति विस्मयनटा ममाद्रिसुते ।।४१।।

(ये परागान् वहन्ति ते अपरागाः स्युरिति विस्मयः ।
अप+रागाः वीतरागाः इति च्छेदे विरोधपरिहारः ।)

सत्यपि पुनर्भवत्वे स्वस्मिन्नपुनर्भवत्वमानमताम् ।
दिशति त्वाङ्घ्रिनखो यत् तच्चित्रं जगति तुहिनगिरिपुत्रि ।।४२।।

(यद्यपि पार्वत्याः पुनर्भवत्वमस्ति, तथापि तां ये नमस्कुर्वन्ति, तेषामपुनर्भवत्वं नाम मोक्षो भवतीति चित्रम् ।)

शङ्करि मेऽद्य विधत्तां शं करिमुखजननि तावकाङ्घ्रियुगम् ।
यज्जयति पङ्कजाते मज्जननि विनम्रपङ्कजातं च ।।४३।।

(पङ्कजातं कमलं तावकाङ्घ्रियुगं जयति । विनम्राणां नमतां भक्तानां पङ्कजातं पापराशिं च तज्जयति ।)

लगति न विपल्लवो यत्स्मरणेन तदङ्घ्रिपल्लवः पुंसाम् ।
शैलाधिपनन्दिनि ते श्रेयांसि ममातनोतु भूयांसि ।।४४।।

(विपदो लवः विपल्लवः । अङ्घ्रिः पल्लव इव अङ्घ्रिपल्लवः ।
उपमालङ्कारः ।)

भवदङ्घ्रिद्वयं वैभवदं मे भूयाद् वैभवदं भवपुरन्ध्रि ।
स्त्रीभवदं सार्थमहास्त्रीभवदम्बुजदृगङ्गनावन्द्ये ।।४५।।

(भवो भद्राप्तिसत्तयोः)

सुखमम्ब मे विदधतां सुमुखाः पाटलरुचस्तवाङ्घ्रिनखाः ।
नमदमरीमूर्धसु ये सीमन्तामुक्तमौक्तिकायन्ते ।।४६।।

(सीमन्तः केशमध्ये रेखा । मौक्तिकानीवाचरन्ति मौक्तिकायन्ते ।
अमराणां स्त्रियः अमर्यः । तासां मूर्धसु अमरीमूर्धसु ।)

सिञ्जानौ तव पदमणिमञ्जीरौ कुञ्जरास्यजनयित्रि ।
संजनयतां श्रियं मे कञ्जाक्षवधूललाटपरिलाल्यौ ।।४७।।

(कंजाक्षो हरिः, तस्य वधूर्लक्ष्मीः । कुञ्जरास्यस्य गणेशस्य ।)

जानुयुगं ते पायाज्जननि पुराभ्यर्थ्य निजपतिं रत्या ।
जानेऽर्पितमिव पदयोः मीनाङ्केषुधियुगं यदर्चायै ।।४८।।

(मीनाङ्कस्य मन्मथस्य इषुधियुगं तूणीरयुग्मं यदर्चायै यत्पूजायै अर्पितमिव जानुयुगमस्ति । उत्प्रेक्षा ।)

ऊरुयुगं मां पायाच्चारुतरं ते कुसुम्भवसनाङ्कम् ।
गौरि यदचूचुरत्तन्मारारेर्दुर्निवारधृतिरत्नम् ।।४९।।

(अचूचुरत् = अचोरयत् । पार्वत्या ऊरुयुगं मारारेः शिवस्य धृतिरत्नं धैर्यरूपं रत्नमचोरयत् अपाहरदिति भावः ।)

त्र्यम्बकमानसमत्तस्तम्बेरमविहरणैककृतकाद्रिः ।
अम्ब नितम्बयुगं ते जाम्बूनदवसनलसितमवतान्नः ।।५०।।

(त्र्यम्बकस्त्रिनेत्रः । स्तम्बेरमा गजः । कृतकाद्रिः कृत्रिमः क्रीडाशैलः । जाम्बूनदं सुवर्णम् । अन्यत् स्पष्टम् ।)

घनजघनद्वितीयं ते कनककनन्मेखलाङ्कमवतान्नः ।
वनचारिशेखरासेचनकं नीहारधरणिधरतनये ।।५१।।

(आसेचनकं नयनानन्ददम् । नीहारो हिमम् । धरणिधरः पर्वतः । तस्य कन्या पार्वती ।)

काञ्चनकाञ्चीकलितं पञ्चाननरमणि ते तनु वलग्नम् ।
कञ्चन संचितमेनस्संचयमर्दयतु मामकं देवि ।।५२।।

(काञ्चनं कनकम् । काञ्ची मेखला । पञ्चाननः शिवः ।
वलग्नं मध्यम् । एनः पापम् । अर्दयतु नाशयतु ।)

अम्बरमणीयसा चितमम्बरमणिमेखलावता येन ।
अम्ब रमणीयमवतु तद् अम्बरमणिशशिदृशे तव वलग्नम् ।।५३।।

श्यामलताकलिता ते रोमलता पातु मामगेन्द्रसुते ।
सोमधरहृदयबन्धनदामेवाभाति या स्मरन्यस्तम् ।।५४।।

(सोमधरश्शिवः । तस्य हृदयबन्धनस्य दाम रज्जुः । अत्र उत्प्रक्षालङ्कारः ।)

नाभिर्गङ्गावर्तसनाभिस्ते देवि दिशतु कुशलं मे ।
शोभाराशिस्तनुते यो भूतेशस्य नयनसाफल्यम् ।।५५।।

(आवर्तोऽम्भसां भ्रमः । सनाभिस्सदृशी । भूतेशश्शिवः ।)

सुक्षेमं दिशतां मे दाक्षायणि ते सदृक्षवक्षोजौ ।
साक्षादिवोक्षकेतोरक्षयवसुपूर्णकलशनिक्षेपौ ।।५६।।

(उक्षकेतुर्वृषभध्वजः ।)

कण्ठीरववाहिनि ते कण्ठः कुण्ठितपयोधिशङ्खश्रीः ।
लुण्ठतु मामकजडतां कण्ठिकयालङ्कृतो मणीमय्या ।।५७।।

क्षोणीध्रपुत्रि तावकपाणी मे भोगमोक्षदौ भवताम् ।
शाणाम्बुजानि याभ्यां ह्रीणानि जलाशयेऽनुमज्जन्ति ।।५८।।

(क्षोणीध्रः पर्वतः । ह्रीणानि लज्जितानि ।)

त्रिजगन्मातस्तावकभुजसुरकुजशिखरपल्लवप्रतिमौ ।
पाणी दिशतां वाणीक्वाणमधुरवाणीं नः ।।५९।।

(भुजावेव सुरकुजौ कल्पवृक्षौ । रूपकम् ।)

चिबुकं तत् सरसवचःस्तबकं मे दिशतु तावकम् देवि ।
शबलमधरोष्ठहसितप्रभाभिरासेचनकमनङ्गरिपेः ।। ६० ।।

(शबलं नानावर्णम् । अनङ्गरिपोः शिवस्य । तदासेचनकं तृप्तेर्नास्त्यन्तो यस्य दर्शनात् ।)

ताटङ्करत्नशोभापाटलितं ते कपोलयुगलं मे ।
घोटीमिवास्यरङ्गे नाटयतु कृपीटजासनवधूटीम् ।। ६१ ।।

(ताटङ्करत्नं कर्णभूषणस्थं रत्नम् । घोटी वडवा । आस्यरङ्गे मुखरूपे रङ्गे । कृपीटजासनवधूटीं सरस्वतीं नाटयतु नर्तयतु । मम वदने सरस्वती नृत्यतु इति कवेरभिप्रायः ।)

अधरोष्ठाववतां मामधरीकृतबिम्बविद्रुमावम्ब ।
विधुमौलिः पीत्वा यत्सुधारसं जितह लाहलो जयति ।। ६२ ।।

(विद्रुमः प्रवालः । विधुमौलिः शिवः ।)

व्यासयतु मन्मतिं ते नासा नगपुत्रि सुरभिलश्वासा ।
या सा भूषामौक्तिकभासा हसतीव चाम्पकं कोशम् ।। ६३ ।।

लपनाम्बुजलावण्यप्रपूरशफरौ तवाक्षिणी देवि ।
विपुले कृपारसार्द्रे व्यपनयतां मामकीनभवतापम् ।। ६४ ।।

(लपनं मुखम् । शफरौ मीनौ ।)

कर्णौ ताटङ्करुचा कीर्णौ ते देवि वितरतां कुशलम् ।
तूर्णं कटाक्षकुल्यापूर्णकृपापूरनिर्गतावर्तौ ।। ६५ ।।

(पूरः प्रवाहः । कुल्या कृत्रिमा सरित् ।)

भ्रूयुगलमम्ब ते मां पायादानीलमास्यशशिचिह्नम् ।
कायजरिपुरपि येन प्रायस्स्वायत्ततां विजहौ ।। ६६ ।।

(कायजो मन्मथः, तस्य रिपुः शिवः । स्वायत्ततां स्वातन्त्र्यं, विजहौ तत्याज ।)

वदनं तव सरसीरुहवदनन्तश्रीकमिन्दुधरजाये ।
सदनङ्गभाग्यलक्ष्मीसदनं मां पातु दृष्टदरहसितम् ।। ६७ ।।

(अनन्ताः श्रियो यस्य तदनन्तश्रीकम् । दरहसितं मन्दहासः ।)

शृङ्गारवार्धिजन्मा सङ्गतमृगमदललाममृगशाली ।
मङ्गळहसितज्योत्स्नासङ्गी मोदयतु मां त्वदास्यशशी ।। ६८ ।।

(शृङ्गार एव वार्धिः सागरः, तत्र जन्म यस्य सः । सङ्गतं मृगमदललामं कस्तूरीतिलकमेव मृगो हरिणः, तेन शालते शोभते इति तथा । मङ्गलहसितमेव ज्योत्स्ना, तेन सङ्गः सम्बन्धो यस्य सः, त्वदास्य शशी त्वन्मुखचन्द्रः, मां मोदयतु हर्षयतु । सावयवरूपकम् ।)

नखमुखरितवीणास्वरसुखानुभवदरनिमीलिताक्षियुगम् ।
मुखकमलमम्बिके मां सुखयतु ते मृदुहसितमधुलसितम् ।। ६९ ।।

पालयतु मां त्वदीयः फालः प्रालेयशैलपतिबाले ।
नीलालकचुम्बी यो बालेन्दुं हसति जलदकलाङ्कम् ।। ७० ।।

(फालः अलिकम् । प्रालेयं हिमम् । अलकाः कुन्तलाः । बालेन्दुं हसतीत्यनेन तत्सादृश्यं गम्यते। आर्थी उपमा ।)

अलिकं ते धृतमृगमदतिलकं शम्भोः स्वचुम्बनावसरे ।
पुलकं जनयति यन्मिलदलकं तत्पातु मां जगन्मातः ।। ७१ ।।

(पुलकं रोमाञ्चं जनयति)

सुकरास्तवाम्ब चिकुरा मकराङ्कविनीलरत्नमुकुराभाः ।
सुकुमारचन्द्रकैतकशिखावतंसा भवन्तु शुभदा मे ।। ७२ ।।

श्रीचक्रराजनिलया श्रीचतुराननसतीड्यपादद्वितया ।
वाचामगोचरा या सा चेतसि वसतु पशुपतेर्जाया ।। ७३ ।।

ओङ्कारकमलहंसीं ह्रीङ्काराञ्चत् त्रिकोणचक्रस्थाम् ।
कुङ्कुमसमानवर्णां शङ्करजायामहं भजेऽपर्णाम् ।। ७४ ।।

अकारादिवर्णनम्

अङ्गभवजयपताकां शृङ्गारब्रह्मसूत्रगुरुकटकाम् ।
तुङ्गभवाम्बुधिनौकां मङ्गलदां स्तौमि चण्डिकामेकाम् ।। ७५ ।।

अरुणामनवधिकरुणाम् अनघाम् अनलाशयाम् अगण्यगुणाम् ।
अमृतप्रदाम् अमेयाम् अम्बामनवद्यमूर्तिमवलम्बे ।। ७६ ।।

अब्धिनवनीतशेखरम् अगपतिकुलदीप्यमानभवभाग्यम् ।
अनुकम्पाकरम् अनुपमम् अनिशं शङ्करकलत्रमहमीडे ।। ७७ ।।

(अब्धिनवनीतं चन्द्रः । अगपतिकुलं हिमाचलवंशः ।)

अनया सनयावनया तनुयावत्कान्तिलज्जितयमुनया ।
घनयाब्जझषविलोचनया तनया वयमादृता मृडाङ्गनया ।। ७८ ।।

(अब्जं कमलं, झषो मीनः । कमलाक्ष्या मीनाक्ष्येति यावत् । तनयाः पुत्राः ।)

अनुकम्पामृतनद्या आश्रितचेताकोरकौमुद्याः ।
अभया वयमखिलाद्या आरूढमहेश्वराङ्कमणिवेद्याः ।। ७९ ।।

अनवरतं सनवरतं घनवरतण्डुस्ववाहने देवे ।
व्रज परमं स्वजपरमं भज परमङ्गळकरं महः किमपि ।। ८० ।।

(नवरतेन सह सनवरतम् । तण्डुर्नन्दी । महस्तेजः ।)

अकारावृतलीलाशुकमकुसुम्भांशुकमनात्तगिरिशाङ्कम् ।
अकलितपीयूषांशुकमनाद्यन्तं दैवतं (न पूज्यते)ऽस्माभिः ।। ८१ ।।

अनुनासिकाग्रमनुगतविनूत्नमुक्तामणिं गिरिशरमणीम् ।
अनुचिन्तयेऽहमम्बाम् अनुदिनमगाकन्यकां सदवलम्बाम् ।। ८२ ।।

अवरोधमङ्गजरिपोरविरोधं कमपि निगमसिद्धान्तम् ।
सवरोधकमाशु भवार्णवरोधः कलननिपुणमवलम्बे ।। ८३ ।।

(अवरोधोऽन्तःपुरम् रोधस्तीरम्)

अरविन्दसुन्दरास्यां कुरूविन्दद्योतबन्धुभूतोष्ठीम् ।
सरवीन्दुलोचनाङ्कां परबिन्दुमयीं भजामि परमेशीम् ।। ८४ ।।

अव्यादव्याजदया भव्या भव्यालिदुर्गमा मुनिभिः ।
भव्या भव्याप्ततनूर्दिव्या दिव्याहृतीडिताम्बास्मान् ।। ८५ ।।

आद्यामाश्रितवरदाम् आनन्दमयीम् अनन्तगुणनिलयाम् ।
आब्रह्मकीटजननीम् आर्याम् आराधयेऽहमाजीवम् ।। ८६ ।।

आब्रह्मकीटधात्रीम् आम्नायाम्रेडिताङ्घ्रिमाहात्म्याम् ।
आनन्दामृतदात्रीम् आश्रय चेतस्तुषारगिरिपुत्रीम् ।। ८७ ।।

इन्दीवरदलनयनाम् इन्दुधरामिष्टदायिनीं भजताम् ।
इन्दिन्दिराभचिकुराम् इन्द्राणीड्यां भजेऽहमिन्द्राक्षीम् ।। ८८ ।।

ईशानपट्टमहिषीम् ईहितदाम् ईतिघातिनीम् ईशीम् ।
ईक्षणरक्षितभुवनाम् ईरविनुत्याङ्घ्रिमीश्वरीमीडे ।। ८९ ।।

उत्सङ्गगतां शम्भोरुत्पलनयनामुरोजभरनम्राम् ।
उत्तप्तकनकवर्णाम् उपनिषदीड्याम् उमामहमुपासे ।। ९० ।।

ऊरीकृतजगदवनाम् ऊर्मिळकरुणाम् उपासकोदाराम् ।
ऊर्जस्विनीमुदारम् ऊढामीशेन कांचिदहमीडे ।। ९१ ।।

ऋग्यजुषनुता ऋज्वी ऋणहन्त्री ऋषिमता ऋभुक्षेड्या ।
ऋद्धिकरी ऋतुकर्त्री ऋषभकुरङ्गीप्रिया ऋतं पायात् ।। ९२ ।।

(अत्र ऋत्यकः इति सूत्रेण सन्ध्यभावो ज्ञेयः ।)

ॠषयुतामलगात्री ॠजितचमरीरुहा जगद्धात्री ।
ॡपुत्री शुभदात्री ॡप्रणुता पातु मां जगत्पात्री ।। ९३ ।।

एकरदैकजननीम् एकाग्रमनःप्रियङ्करीं भजताम् ।
एनस्सञ्चयशमनीम् एणाङ्कवतंसवल्लभां वन्दे ।। ९४ ।।

ऐहिकमामुष्मिकमप्यैश्वर्यमुपैति यत्पदस्मरणात् ।
ऐतिह्यमागमानाम् ऐशं तत्किञ्चिदैक्यमवलम्बे ।। ९५ ।।

ओकस्सकलगुणानाम् ओघः करुणारसस्य परमोजः ।
ओषधिरघामयानाम् ओङ्कारार्थस्तनोतु नः श्रेयः ।। ९६ ।।

और्वानलमघवार्धेरौषधमतुलं पुनर्भवव्याधेः ।
औरसमवनीध्रपतेरौत्सुक्यं पुररिपोः कलये ।। ९७ ।।

कमलदलायतनयना करिगमना कायकान्तिजितयमुना ।
कनकाद्रिशिखरसदना कन्तुरिपोरङ्गनास्तु शरणं नः ।। ९८ ।।

कचधृतशशिखण्डिकया कबरीभरहसितमदशिखण्डिकया ।
भृतभुवनपिचण्डिकया भृता वयं भुवि कयापि चण्डिकया ।। ९९ ।।

(अल्पः खण्डः खण्डिका । मदशिखण्डिको मत्तमयूरः । पिचण्डः उदरम् ।)

करुणारसवाहिन्यै कन्तुरिपोरपि मनोविमोहिन्यै ।
कण्ठीरववाहिन्यै कलये नतिमीश्वराङ्कगेहिन्यै ।। १०० ।।

करधृतकीरकिशोरं कायद्युतिलेशहसितकाश्मीरम् ।
कन्तुरिपुहृदयचोरं कलये हृदि वस्तु निस्तुलाकारम् ।। १०१ ।।

कनकपटीकलितकटी कण्ठतटीहारलसदुरोजपुटी ।
कन्तुकुटीरभ्रुकुटी कविरटीशयतु मां मृडवधूटी ।। १०२ ।।

कळिकया कुङ्कुमतिलकाळिकया कान्तिहसितकाळिकया ।
बालिकयाद्रेस्स्मरकरबालिकया सकरुणास्सुबालिकया ।। १०३ ।।

कालीयकालिकाञ्जनकालिन्दीकालकान्तिभवकाया ।
कालारिकामिनी मे काळी कामान् करोतु कारुण्यात् ।। १०४ ।।

कुन्दरदां सुन्दरदां मन्दरदम्भापहारिवक्षोजाम् ।
हृदय सदा तदय मुदा सदयमदादुदयमङ्गजस्य यत् ।। १०५ ।।

खचरपतिनुत्यचरणा खञ्जननयना खनीलखनिगात्री ।
खण्डितखलप्रताना खण्डेन्दुधराङ्कखट्विका जीयात् ।। १०६ ।।

गजवदनगुहोत्सङ्गा गणप्रिया गरुडरथविधीड्यपदा ।
गरळगळाङ्कगता मे गतिरस्तु परा जगत्त्रयीगर्भा ।। १०७ ।।

गजयानया तुषारागजया निजदृष्टिपालिताङ्गजया ।
विजयास्त्रदया वयमधिविजया लीलामुदितवृषध्वजया ।। १०८ ।।

घनजघनं घनचिकुरं घनकुचम् अघटितघटनम् अघघरट्टम् ।
घनसारगौरगात्रं घटयतु नः कुशलमीश्वरकलत्रम् ।। १०९ ।।

चतुरास्यनुत्यचरणा चक्रकुचा चञ्चरीकनीलकचा ।
चन्दनचर्चितदेहा चण्डी मां पातु चन्द्रधरजाया ।।११०

चालितदुरितव्राताः फलिता नः सुचरितावनीजाताः ।
ललिता यन्मयि पतिता ललिताम्बायाः कटाक्षकल्पलताः ।। १११

(सुचरितान्येव अवनीजाताः वृक्षाः । कटाक्षा एव कल्पलताः इति रूपकम् ।)

चामरसहितकरश्रीतामरसभवाङ्गनासमासेव्या ।
पामरसभावितर्क्या प्रेमरसमुमा तनोतु मयि सततम् ।। ११२

(अत्र चामरस+हितकरश्रीः इति, चामर+सहित+करश्रीः इति पदच्छेदोऽभिप्रेत इति भाति । चामरसः चामराजः । तामरसं पद्मम्, तामरसभवः पद्मभूः ब्रह्मा, तस्याङ्गना पत्नी सरस्वती, तया सेव्या । पामराणां सभायाम् अवितर्क्या अनूह्या उमा ।)

चूडालं शशिकलया व्रीडालङ्कृतमुरोजभरनम्रम् ।
क्रीडालम्पटमधिमृडम् ईडालम्बं नुमः किमपि वस्तु ।। ११३

छविनिर्जिततापिञ्छा छत्रध्वजचक्रलाञ्छनपदाब्जा ।
छन्दोमयी क्रियान्नः छन्दं छन्ना गुणैरचलकन्या ।। ११४

जतुशोणजलजचरणा जल्पितनिगमा जनार्दनाजनुता ।
जननी जगत्त्रयाणां जयतु जपाप्रसवसच्छवी देवी ।। ११५

जलदकचं कलशकुचं कलशुकचञ्चलकरं श्रितेष्टकरम् ।
भृतमदनं स्मितवदनं मतिसदनं कवयतां भजे तेजः ।। ११६

जगतामवलम्बाया जपासुमस्तबकरुचिविडम्बायाः ।
भृत्या वयमम्बाया भृतकोमलतारकाकुटुम्बायाः ।। ११७

झषलोचना कृपारसझरप्लुता श्रितजनार्तिजलदानाम् ।
झञ्झावायुः कलयतु झडिति मदिष्टार्थमम्बिका जगति ।। ११८

टङ्कमघाद्रेर्मणिताटङ्करुचोज्ज्वलकपोलमानीलम् ।
टङ्कारिकुसुमचापविटङ्कास्यं पातु भूमिभृदपत्यम् ।।११९

ठक्कासुरदमनी सा वृषठणत्कृतिश्रवणजातसन्तोषा ।
ठपराधीनस्वान्ता ठबिम्बमध्यस्थिताम्बिका जीयात् ।। १२०

डमरुरवश्रवणोत्का डाम्भिकदनुजार्दिनी दयासीमा ।
डाकिन्यादिनिषेव्या डम्बरशौर्या क्रियाज्जयं दुर्गा ।। १२१

ढक्काताडनविसरड्ढङ्कृतिपतितासुराहवारम्भा ।
ढक्कारोहणदक्षा ढाकशिरसां जयतु दुर्जया दुर्गा ।। १२२

तरुणतमालवतंसां तन्त्रनुतां तारकाधिपोत्तंसाम् ।
तरुणीं मृडस्य नतभवतरणिं करुणातटाकमहमीडे ।। १२३

तामरसं कलयन्ती तामरसं या मुखेन सरसेन ।
कलयामि हृदि सुधांशोः कलयात्मशिरसमीशानीम् ।। १२४

तरुणाब्जपादनतसुरतरुणा केनापि शङ्कराङ्कजुषा ।
हरिणाङ्कमौलिहृदयविहारिणा महसाद्य सशरणा हि वयम् ।। १२५

तुहिनाद्रिजे मनो मम तु हि नाद्रियते त्वदन्यदैवतकम् ।
दर्शय तदिन्द्रनीलादर्शयथाकान्ति कान्तरूपं ते ।। १२६

स्थाणोस्सव्याङ्कस्था स्थविरमुनीड्या स्थिरश्रितजनास्था ।
स्थावरचरसूः स्वकुचस्थाल्या प्राशयतु नः कृपाक्षीरम् ।। १२७

दमितदनुजां दरस्मितवदनां दर्शितदयां मयि प्रणते ।
दलदब्जलोचनां तां दयितामीशस्य नौमि दक्षसुताम् ।। १२८

धरणीधरधवतनुजा धर्मोद्धारणोन्मुखी धवलवर्णा ।
धनदाप्तधर्मदारा धन्यं तन्यादनन्यगतिकं माम् ।। १२९

नन्दितनमन्मुकुन्दे निन्दितनक्षत्रकान्तिनखबृन्दे ।
भजकानन्दे वन्दे स्कन्देभमुखप्रसूपदारविन्दे ।। १३०

नयनरुचिविहसितैणान् नतगीर्वाणान् नवार्ककरशोणान् ।
नमदवने पारीणान् नमामि शतशोऽद्य शङ्करप्राणान् ।। १३१

नरशरदे कुलिशरदे नवशरदेणाङ्कबिम्बनिभवदने ।
प्रदिश शिवे स्ववशशिवे नवशशिवेष्टितसुमस्तकेऽभीष्टम् ।। १३२

नालीकभवमुखेडितनालीकगुणा नतावनैकचणा ।
काळी कलयतु कविलोकाळीकलभं निजाङ्घ्रिभजकं माम् ।। १३३

निगमशिरःपरिमृग्यं नीलग्रीवस्य किमपि सौभाग्यम् ।
निखिलामरनतियोग्यं नितरां विहरतु ममायुरारोग्यम् ।। १३४

निरतिशयरतिशयाञ्चितचरणयुगा रणयुगाशरनिहन्त्री ।
मकरपदकरपदाब्जा भवरमणी वरमणीन् विधत्तां नः ।। १३५

निगमान्तविनुतभूम्ने नीलग्रीवाङ्कनिर्मलिनधाम्ने ।
नवरत्नकलितधाम्ने नमामि कस्मैचिदन्वहं धाम्ने ।। १३६

नौका शोकाम्बुनिधेर्मूकायापि प्रदत्तवाक्श्रीका ।
लोकाळिमातृका नः श्रीकाळी दिशतु कुशलमभिलषितम् ।। १३७

पदभजकावनमत्यां परवत्यां पुररिपुकृपावत्याम् ।
भक्तिर्मम भगवत्यां भवे भवे चापि भवतु पार्वत्याम् ।। १३८

पञ्चविरञ्चमयश्रीमञ्चगतां काञ्चनाद्रिशिखरस्थाम् ।
पञ्चास्यपट्टमहिषीं काञ्चिदहं चिन्मयीं भजे देवीम् ।। १३९

पिकयाचितकलरवयापि कया करुणामृतैकवापिकया ।
शुकयानावनया किंशुकयावककुङ्कुमारुणांशुकया ।। १४०

पूर्णेन्दुसदृशवदना कर्णोज्ज्वलतरणिचन्द्रताटङ्का ।
स्वर्णाम्बिका विधत्तां तूर्णं मामकमनोरथम् पूर्णम् ।। १४१

भवदाराधनदशया ब्रवीमि किं दुर्गता अपि मानुष्याः ।
भवदाराधनदशया भवन्ति जगतीश्वरास्सदार्थिभ्यः ।। १४२

मातः प्रातस्सरसीजातश्रीहासि तेऽङ्घ्रियुगलं नः ।
चेतः पथे विचरतां नातः परमर्थयेऽद्रिजाते त्वाम् ।। १४३

माता समस्तजगतां मातामरसाङ्गनेहितपदाब्जा ।
या ताम् ऐरावतमृदुयातामाश्रय तुषारगिरिजाताम् ।। १४४

यागाशनेष्टवरदा योगाढ्या मुनीन्द्रमानसध्येया ।
भोगापवर्गदा मे वागैश्वर्यं तनोतु शर्वाणी ।। १४५

याचे देवि दया चेद् भवतीं मयि शैलनन्दिनि शुभवतीम् ।
वितर वरं सच्चरितं चरणे रुचिरचितपक्कलिकुचवने ।। १४६

वचनरुचिविजितमधुना वदनद्युतिलेशपरिहसितविधुना ।
वश्यश्रीरहमधुना वरदेन मृडस्य केनचिन्निधिना ।। १४७

वामाङ्कालङ्करणं कामारेरजहरीड्यमृदुचरणम् ।
श्यामलमनवधिकरुणं सोमाननमस्तु नः शरणम् ।। १४८

विग्रहशोभाविरचितविद्रुमकुरुविन्दविग्रहः कोऽपि ।
सानुग्रहस्य भूयात् सततं शम्भोः परिग्रहोऽस्मासु ।। १४९

विश्वावनधृतदीक्षाः विकचविनीलोत्पलावलिसदृक्षाः ।
विनतेष्टकल्पवृक्षाः वितरन्तु शुभानि मे तव कटाक्षाः ।। १५०

वैखानसकुलरसना लेखालिखिताभिधाक्षराम्नाया ।
लेखाराध्या दिशतु विशाखाङ्का शङ्करी पुमर्थान्नः ।। १५१

वैभवदं मे भूयाद् वै भवदङ्घ्रिद्वयं भवपुरन्ध्रि ।
स्त्रीभवदं सार्थमहास्त्रीभवदम्बुजदृशाङ्गनावन्द्ये ।। १५२

शिखरिसुता शिवसहिता शिष्यनुता शिशिरकिरणशेखरिता ।
शिवदयिता शीलयुता शिथिलयतादस्मदीयमतिजडताम् ।। १५३

शुकशाबशालिहस्ते शुभ्रांशुकलाविलासपदमस्ते ।
कुरु शुभमम्ब नमस्ते कुर्मश्शतशो नवारुणगभस्ते ।। १५४

(शुकशाबः शुकशिशुः । शुभ्रांशुश्चन्द्रः । मस्तं मस्तकम् । गभस्तिः किरणः)

सकलभुवनैकमात्रे समवेतायै सदा निटिलनेत्रे ।
पदवनजभजकमात्रेऽपरतन्त्रायै नमो नगदुहित्रे ।। १५५

सङ्कल्पं नः कलयतु शङ्करदयिते त्वदङ्घ्रिकल्पद्रुः ।
भ्रमरहितैः सुमनोभिः समञ्चितोऽजस्रमिष्टफलदायी ।। १५६

(भ्रमरहितैः द्विरेफाणां प्रियैः सुमनोभिः पुष्पैः समञ्चितः पूजितः । भ्रम-रहितैः भ्रान्तिशून्यैः सुमनोभिः देवैः समञ्चितः इति च ।)

जय विजयविशिखदायिनि जय जगदीश्वरि जनार्दनादिनुते ।
जय जननि जाड्यमाथिनि जय जगतीधरकुमारि जय गौरि ।। १५७

(विजयोऽर्जुनः, तस्मै पार्वती अस्त्रं ददौ किरातार्जुनीयप्रसङ्गे । विशिखो बाणः । जाड्यं मथ्नाति तच्छीला जाड्यमाथिनी ।)

जय जय धनञ्जयाम्बकजाये जय जय जपासुमच्छाये ।
जय जय जगत्त्रयीजनगेये जय जय मुनीन्द्रहृद्ध्येये ।। १५८

(धनञ्जयोऽग्निरम्बकं नेत्रं यस्य स शिवः । तस्य जाया पत्नी । छाया कान्तिः । तत्सम्बुद्धिः ।)

तटिद्गौरी गौरी हितकृदसुरारीडितपदा
जपाशोणा प्राणा विवशसुमबाणासनरिपोः ।
कुभृत्कन्या मान्या मुनिततिभिरन्यादृशदया
सदापायात्पायात् पुरमथनजाया झडिति माम् ।। १५९

(तटिदिव गौरी तटिद्गौरी । असुरारिर्विष्णुः, तेन ईडितं स्तुतं पदं चरणं यस्याः सा । सुमानि पुष्पाणि बाणासनं धनुर्यस्य सः । मन्मथ इत्यर्थः । तद्रिपोः शिवस्य । कुभृत् पर्वतः, तस्य कन्या । पार्वतीत्यर्थः । अन्यादृशी विलक्षणा दया करुणा यस्याः सा । सदा अपायात् पायात् ।)

लक्ष्मीनारायणनतशिरोमौलिमाणिक्यशोभा-
राजीनीराजितपदयुगौ विष्टपानां त्रयाणाम् ।
मातापित्रौ श्रितजनमनोभीष्टकल्पावनीजौ
श्रेयो भूयो मम वितरतां श्रीमृडानीमहेशौ ।। १६०

(विष्टपानां जगताम् । मातापित्रौ इत्यपाणिनीयम् । कल्पावनीजौ कल्पवृक्षौ)

इति श्रीबसवप्पशास्त्रिकृतम् आर्याशतकं समाप्तम् ।

आर्याशतकस्य स्तुतिरूपत्वादत्र कवेश्चातुर्यं शब्दयोजनायामेव द्रष्टव्यं प्रथमतः । तच्च विपुलतया दृश्यते । यमकादिशब्दालङ्काराणां योजनायां कवेः प्रावीण्यं पद्ये पद्ये गोचरीभवति । अतीव मृद्वी रचना । माधुर्याख्यो गुणः सर्वेषु पद्येषु विभाति । तत्र तत्र पाणिनिव्याकरणाननुमतानि पदानि कविना प्रयुक्तानि । निरङ्कुशाः कवय इति तत्सोढव्यम् । कविः कर्णाटकभाषाप्रवीणः । तत्सम्प्रदायानुसारेण देववाणीपद्येष्वपि बहुत्र तेन द्वितीयक्षरप्रासो रक्षितः । यतिनियमश्च न पालितः ।

एकोनविंशे शतमाने मैसूरुप्रभवः संस्कृतभाषाकविभ्यः प्रोत्साहं दत्वा तद्द्वारा कन्नडभाषाया अप्युन्नतिं साधयामासुः । तैः पोषितेषु कविषु बसवप्पशास्त्री अनितरसाधारणीं कीर्तिम् अवाप्नोत् । तेन रचितमार्याशतकं सर्वजनादरणीयं विद्यते । सहस्रशः संस्कृतपद्यानि येन कण्ठस्थीकृतानि, व्याकरणं च येन सम्यगधीतं, येन च्छन्दश्शास्त्रनियमाः करतलामलकीकृताः, तेनैव एतादृशं स्तोत्रं शक्यरचनम् ।

***

त्रिषष्टिपुरातनगणस्तवः

बसवप्पशास्त्रिणा रचितेषु संस्कृतकाव्येषु मुख्योऽयं स्तवः । त्रिषष्टिपुरातनानां वीरशैवसम्प्रदाये स्थानम् उन्नतम् । निष्ठावन्त एते शिवभक्ताः समस्तं भरं शिवे न्यस्य, सकलासु कठिनासु परीक्षासु आत्मस्थैर्येण भक्तिगाम्भीर्येण चोत्तीर्णा भूत्वा शिवलोकं प्राप्तवन्त इति गरीयान् विश्वासो वर्तते । तेषां पुरातनानां कथा अत्र एकैकेन पद्येन वर्णिताः । पद्यानि विविधेषु च्छन्दस्सु रचितानि ।

अस्य ग्रन्थस्य पुष्पिकायां (समाप्तिवाक्ये) *'इति अभिनवकालिदास-बसवप्पशास्त्रिविरचितः त्रिषष्टिपुरातनगणस्तवः समाप्तः'* इति दृश्यते । एवं च कवेरुच्छ्रायकाले अभिज्ञानशाकुन्तलानुवादविरचनानन्तरं कृतिरियं रचितेति ऊहामहे । अस्मिन् स्तवे एकसप्ततिः पद्यानि विद्योतन्ते । आदौ षट्पद्यानि पीठिकारूपाणि । तत्र शिवस्य, पार्वत्याः, विनायकस्य च स्तुतिपूर्वप्रणामविषयत्वं त्रिषु पद्येषु विद्यते । ततः पद्यद्वये काव्यरचनासङ्कल्पः प्रस्तुतः । ततश्चैकस्मिन् पद्ये बसवण्णस्य स्मरणं प्रस्तुतम् । उपान्तिमे पद्ये शिवभक्तेभ्यः सर्वेभ्यः आशिषं कामयते कविः । अन्तिमे पद्ये फलश्रुतिः प्रस्तुता । वाचकानां प्रमोदाय तं स्तवमत्र प्रस्तुमः ।

त्रिषष्टिपुरातनगणस्तवः

श्रीमच्छैलेन्द्रबालाकुचकलशपरीरम्भसंरम्भजृम्भद्-
रोमाञ्चोदञ्चिताङ्गस्तुहिनकरकलालिङ्गितस्वोत्तमाङ्गः ।
सेवाव्यानम्रदेवासुरमकुटमणीराजिनीराजिताङ्घ्रि-
र्दद्यादद्येप्सितार्थान् मम गणपरिषन्मङ्गलस्सङ्गमेशः ।। १
(स्रग्धरा)

अन्तःपुरं पुरारेरन्तः कलयेऽहमाश्रितजनानाम् ।
चिन्तामणिं चिरन्तनसूक्तिशिरश्शुक्तिमौक्तिकं किमपि ।। २
(आर्या)

न विना यत्कारुण्यं कविनायकतामुपैति भुवि मनुजः ।
स विनायकः प्रसीदतु रविनालीकारिलोचनोऽस्मासु ।। ३
(आर्या)

देवानामधिकोऽहमस्मि शृणु मद्भक्तोऽपि मत्तोऽधिकः
स्यादित्यद्रिभुवे शिवेन कथितं संश्रद्दधानो वचः ।
शम्भुश्रीपदगत्रिषष्टिकगणान् सद्भक्तितः कीर्तितुं
प्रोद्युक्तोऽहमतो ऽस्ति कः क्षितितले धन्यो मदन्यो जनः ।। ४
(शार्दूलविक्रीडितम्)

यथा स्वर्णमेकं किरीटादिभूषा-
विशेषैर्विभिन्नं तथा शम्भुरेकः ।
स एषां गणाधीश्वराणां प्रभेदै-
र्जयत्येव तान् कीर्तयाम्यद्य भक्त्या ।। ५
(भुजङ्गप्रयातम्)

शम्भोराज्ञां वहन् स्वे शिरसि शिवमतस्थापनार्थं धरण्यां
मादार्यं मादलाम्बामपि बहु सुखयन् पुत्रभावेन भूयः ।

जानन् श्रीसङ्गमेशाच्चरपरिचरणप्रक्रमं वीरशैव–
क्षीराकूपारचन्द्रोऽजनि शिवपुरि यस्तं निषेवे वृषेन्द्रम् ।। ६
(स्रग्धरा)

स्वं दृष्ट्वा धुरि सापराधगणिकाचारूपचारोज्ज्वलं
कोपान्मा स्पृश नाथ मां स्पृशसि चेदास्ते मृडाज्ञेत्यलम् ।
तूष्णींभावमुपागतां स्ववनितां त्यक्त्वा चिरं शङ्करं
यः प्रत्यक्षमथाकरोत्तमनघं श्रीनीलकण्ठं भजे ।। ७
(शार्दूलविक्रीडितम् । पुरातनेषु प्रथमस्य श्री नीलकण्ठनाम्नः शिवभक्तस्य कथा)

पोन्नम्बलाख्यपुर्यां
मर्यादां धर्मवारिधेर्महताम् ।
योऽदर्शयत्तमार्यं
ध्याये सानन्दतिल्लेवाळन्दम् ।। ८
(आर्या । तिल्लेवाळन्दाख्यस्य पुरातनस्य कथा)

प्राणेश्वराय तुहिनाद्रिभुवः प्रदत्तं
पाणिग्रहं जनमुदीक्ष्य निरुध्य बाढम् ।
श्रोणीभवन्तमपि बन्धुजनं प्रहृत्य
स्थाणुं तुतोष तामिहप्पगेयाण्डमीडे ।। ९
(वसन्ततिलका । इहप्पगेयाण्डपुरातनस्य कथा)
(अत्र तोषयामासेति वक्तव्ये तुतोषेति प्रयोग : चिन्त्यः)

भुक्त्यै मृडभक्तानां
भृतमर्थं भुञ्जतः परं बन्धून् ।
भञ्जन्नतोषयद् यो
भर्गं तं भावयामि पुलियाण्डम् ।। १०
(आर्या । कोल्पुलियाण्डाख्यस्य पुरातनस्य कथा)

गोक्षीरैरिन्दुगौरैः स्नपितमनुपदं वीक्ष्य साक्षात्स्वलिङ्गं
धिक्कृत्यागस्करं स्वं पितरमपि परीभूय हस्तायुधेन ।
आहत्यापाटयद्यस्त्रिपुरहरपुरीगोपुरोद्यत्कवाटं
तं वन्दे चण्डिकेशप्रथितगणपदश्रीविभुं चण्डनाथम् ।। ११
(स्रग्धरा । पुरातनस्य चण्डनाथस्य कथा ।)

सुकुमारकुमारकायमांसं
जितमाराय हराय यो निवेद्य ।
रजताद्रिमथारुरोह तं श्री
चिरुतोण्डं शिवभक्तिशौण्डमीडे ।। १२
(उपजातिः । चिरुतोण्डस्य पुरातनस्य कथा)

करिमुखपितुरर्चार्हं
करण्डकप्रसवनिकरमाकिरति ।
करिणि तमभञ्जयद् यः
स्मरामि तं वीरवृत्तमिरिभक्तम् ।। १३
(आर्या । इरिभक्ताख्यस्य पुरातनस्य कथा)

व्याघ्राजिनाम्बरधरार्चनयोग्यपुष्पम्
आघ्राय पूर्वमपराधकमाचरन्त्याः ।
पत्न्यास्तिलप्रसवकोशसमाननासां
चिच्छेद यस्तमनघं तोणियाण्डमीडे ।। १४
(वसन्ततिलका । चिरितोणियाण्डस्य पुरातनस्य कथा)

आदानाय यथा प्रसारितवती पाणिं गिरीशार्चना-
पुष्पस्याप्यबले प्रसारय तथा वीक्षेऽद्य साक्षादिति ।
गर्जन् तर्जनकं प्रकङ्कणवधूपाणिं कृपाणेन य-
श्छित्वा दत्तमुदं मृडाय कळचङ्गाख्यं तमीडेऽन्वहम् ।। १५
(शार्दूलविक्रीडितम् । कळचङ्गाख्यस्य पुरातनस्य कथा)

चरमूर्तिरुर्विचरमल्ल इत्यना-
दरणां तदीयचरणाभिषेचने ।
तरुणीं विलोक्य निचकर्त यः करं
शरणं तमाशु कलिकम्बमाश्रये ।। १६
(कलिकम्बाख्यस्य पुरातनस्य कथा)

पाणिग्रहणे दुहितुः
वेणीं लूत्वाभियाचितां दत्त्वा ।
प्रीणितवान् यः परमं
स्थाणुं तं मानकञ्जरं ध्याये ।। १७
(आर्या । मानकञ्जराख्यस्य पुरातनस्य कथा)

यस्याङ्घ्रिरीशमकुटीतटिनीतटाब्जं
यस्यास्यतोयमभिषेकपयश्शिवस्य ।
यस्याम्बकं त्रिनयनाक्षिचिकित्सकं तं
कण्णप्पभक्तमनिशं शिरसा नमामि ।। १८
(वसन्ततिलकम् । भक्तोत्तमस्य कण्णप्पस्य कथा)

जटिने कस्मैचिद्भुत-
भटमूर्ध्ने स्वं शिरः समर्प्य भयात् ।
पुटभेदनमभजद् यो
निटिलदृशस्तं भजे पगल्चोळम् ।। १९
(आर्या । पगल्चोळस्य कथा)
(निटिलदृशः = फालाक्षस्य शिवस्य । पुटभेदनं पुरम् ।)

तण्डुलेऽस्य वरशर्वनिवेद्ये
तण्डुले गलति वीक्ष्य निजासून् ।
योऽर्पयत् पुरारिपोररिवाळ्ता-
ण्डं भजे तमुरुभक्तिकरण्डम् ।। २०
(स्वागतावृत्तम् । पुरातनस्य अरिवाळ्ताण्डस्य कथा)

काळीभर्तुः कन्थां
काळिमकलितां निजाङ्गरुधिरेण ।
क्षालितवान् यः पावन-
शीलं तिरुकुरुपेतोण्डमहमीडे ।। २१
(आर्या । पुरातनस्य तिरुकुरुपेतोण्डस्य कथा)

प्रसमीक्ष्य फालदेशे
भसितं योधस्य समिति यो भेत्तुम् ।
असुमदिशत् तन्निष्ठा-
वसुनिधिमेणादिनाथमहमीडे ।। २२
(आर्या । पुरातनस्य एणाधिनाथस्य कथा)

धृत्वा जङ्गमवेषं
गत्वा स्वं ताडयति खले यस्तम् ।
नत्वासुखयत्तमधिक
सत्त्वं चलिचेदिराजमहमीडे ।।२३
(आर्या । पुरातनस्य चलिचेदिराजस्य कथा)

मारारिनिन्दकानाम्
आरोहायार्हतान्वयभराणाम् ।
योऽरचयच्छूलोत्करम्
आराध्यं तं भजे कुलच्चरियम् ।। २४
(आर्या । पुरातनस्य कुलच्चरियस्य कथा)

अन्धुखननक्रियोद्धत-
मन्धं स्वं वीक्ष्य विहसतो जैनान् ।
योऽन्धीकृत्याप दृशा-
वन्धरिपो नौमि नाट्यनमिताण्डिम् ।। २५
(आर्या । नाट्यनमिताण्डिनामकस्य पुरातनस्य कथा)

असमाक्षनिन्दकानां
रसनामुन्मूलयन् प्रकोपेन ।
स्वसमयमसुखयदिह य-
स्त्वसमं कलिचिट्टियाण्डमहमीडे ।। २६
(आर्या । पुरातनस्य कलिचिट्टियण्डस्य कथा)

एनःकर्दमपीनं
जैनान्वयपल्वलं लघु वेलंघ्य ।
स्थाणुपदमग्रहीद् यः
सानन्दं तं नमामि वागीशम् ।। २७
(आर्या । पुरातनस्य वागीशस्य कथा)

गिरिपरिवृढकन्यास्तन्यपानात्तभूमा
वरभसितमहिम्ना सुन्दरं कूनपाण्ड्यम् ।
परिषदि रचयन् यो जैनविध्वंसकोऽभूत्
स्मर हृदय तमेवं ज्ञानसम्बन्धिदेवम् ।। २८
(मालिनीवृत्तम् । पुरातनस्य तिरुज्ञानसम्बन्धिदेवस्य कथा)

सङ्गृहीतघनशाङ्करदीक्षां
तुङ्गपिल्लेनयनार्यमुखेन ।
लिङ्गसङ्गमितमङ्गळगात्रीं
मङ्गयक्करसिमेवमुपासे ।। २९
(स्वागतावृत्तम् । पुरातन्याः मङ्गयक्कायाः कथा)

तिरुज्ञानसम्बन्धिकारुण्यवर्षा-
ङ्कुरीभूतसौन्दर्यसस्याभिरामः ।
पुरारातिपादाब्जभृङ्गोऽभवद् य-
स्तमार्योत्तमं सुन्दरं पाण्ड्यमीडे ।।३०
(भुजङ्गप्रयातम् । पुरातनस्य सुन्दरपाण्ड्यस्य कथा ।)

कोपमभिनयति गिरीशे
कौपीनार्थं निजां तनूं तुलयन् ।
कापालिगणपदं यः
प्राप परं तं भजाम्यमरनीतिम् ।। ३१
(आर्या । पुरातनस्यामरनीतेः कथा)

प्राणान्निजलिङ्गार्थं
माणिक्यायतनमारचय्य हृदि ।
क्षोणिनुतोऽभूद् यस्सं-
त्राणरतं पूसलाण्डिमहमीडे ।। ३२
(आर्या । पुरातनस्य पूसलाण्डेः कथा)

चिदम्बरपदालोकमुदं हृदि सदा वहन् ।
स्थिरलक्ष्मीवरोऽभूद्यस्तिरुनाळ्पोवमाश्रये ।। ३३
(अनुष्टुप् । तिरुनाळ्पोवस्य कथा)

यत्र यत्र हृदि कौतुकमासीत्
तत्र तत्र गिरिशायतनौघैः ।
यस्त्वपूरयदिळां तमुदारं
भक्तम् ऐवडेयदेवमुपासे ।। ३४
(स्वागतावृत्तम् । पुरातनस्य ऐवडेयदेवस्य कथा)

भक्तिस्ते दृष्टपूर्वेत्यवितथवचनैर्भक्तवर्यैस्सभायाम्
उद्वाहुश्लाघ्यमानस्सविनयमुदितां पद्धतिं वीरशैवीम् ।
धिक्कुर्वन्तं कृतान्तद्विषमपि कृतवान् साधु लिङ्गाङ्गिनं य-
स्तं वन्दे देववृन्देडितकलिगणनाथाभिधं भक्तवर्यम् ।। ३५
(स्रग्धरा । पुरातनस्य कलिगणनाथस्य कथा)

धूर्तैर्गौलतपस्विभिः प्रमुहिते धूपेऽङ्गभारोचिते
पात्रेऽङ्गारचिते क्षिपन्नचकितो धूपात्मना स्वं वपुः ।

प्रत्यक्षीकृतसोमनाथकरुणावर्षाभिषिक्तं परं
मुक्तोऽभूद् भुवि यस्तमोहिलविभुं ध्याये सकौतूहलम् ।। ३६
(शार्दूलविक्रीडितम् । पुरातनस्य ओहिलार्यस्य कथा)

जन इह गुणगर्भः शम्भुभक्त्यैव भूयाद्
इति दृढतरभक्त्या शङ्करं पूजयित्वा ।
प्रमथगणपदं यः प्राप शर्वप्रसादात्
तमनघकळचङ्गं भक्तवर्यं भजेऽहम् ।। ३७

(मालिनीवृत्तम् । पुरातनस्य कळचङ्गस्य कथा)

शिलोच्चयसुतापतिर्जगति भक्तियुक्तैर्जनैः
प्रसीदति कृतं शिलाततिभिरर्चितोऽपीति यः ।
प्रथां प्रकटयन्निवोपलसमुक्तैरर्चयन्
शिवाधवमतोषयत् तमिह साङ्ख्यतोण्डं भजे ।। ३८

(पृथ्वीवृत्तम् । साङ्ख्यतोण्डपुरातनस्य कथा)

मुग्धेन्दुचूडाय मृडाय दोग्धुं
दुग्धं पशुत्वेन समागतां यः ।
गौरीं दुदोहानतकामदोग्ध्रीं
तं सत्यशीलं तिरुमूलमीडे ।। ३९

(इन्द्रवज्रावृत्तम् । पुरातनस्य तिरुमूलस्य कथा)

दिगम्बरश्रीपदपूजकेभ्यो
दिव्यांशुकं यः स्वयमारचय्य ।
दिशन्नुमानाथमतोषयत्तं
दीनादरं नैसरदेवमीडे ।। ४०

(उपेन्द्रवज्रा । नैसरदेवपुरातनस्य कथा)

वार्तामात्रं गमिते वारि पुरारेः पुरः प्रतिज्ञाय ।
वर्षमजीजनद् यस्तमहं ध्याये पगल्तोणेयदेवम् ।। ४१

(वारि इति रेफान्तस्य मवार्फ शब्दस्य सप्तम्येकवचने रूपम्)

(आर्यावृत्तम् । पुरातनस्य पगल्तोनेयस्य कथा)

प्रकोष्ठधर्षप्रभवं समर्प्य
श्रीखण्डमिष्टं शशिखण्डमौले: ।
अखण्डमैश्वर्यमवाप यस्तं
मृकण्डुभं नौम्यळघण्डमूर्तिम् ।। ४२

(उपेन्द्रवज्रा । पुरातन-ओळघण्डमूर्तिकथा)

गायन्नागेन्द्रकन्यामधुमधुरगळारावमाधुर्यधुर्य-
श्रीगानाकर्णनान्दोळनभवमनृजुं वारयन् स्थाणुलिङ्गे ।
भूपेन प्राप्य धूपं स्वतनुपरिमितं यस्तुतोष स्वयम्भुं
शम्भुं तं भावयाम्योङ्गुलियकलिगणाधीश्वरं सुव्रताढ्यम् ।। ४३

(स्रग्धरा । पुरातनस्य ओङ्गुलियकलिगणनाथस्य कथा)

नीराजयन् शिरोजै-
र्यो राजकलाशिरोमणिं दीप्रैः ।
ताराचलमभजत् तं
धीरं ध्यायामि कडवलं नम्बिम् ।।४४

(आर्या । पुरातनस्य कडवलनाम्बिनाम्न: कथा)

य: सङ्कुचद्गिरिशमन्दिरविद्धदीप-
शोणाम्बुजोदरविकासविधौ सुभक्त्या ।
प्रासेचयत् तरणिरोचिरिवाङ्गरक्तं
भक्तं तमच्छकलियानविभुं नमामि ।।४५

(वसन्ततिलकम् । पुरातनस्य कलियानविभो: कथा ।)

वर्षावसरायाते भूतपतावुद्गताङ्कुरान् व्रीहीन् ।
परिपच्य तान् सुभक्त्यान्वतर्पयत्तमनियाण्डमहमीडे ।।४६

(आर्या । पुरातनस्य अनियाण्डस्य इळेयाण्डगुडिमार इति ख्यातस्य भक्तस्य कथा)

पञ्चप्राणा इति ज्ञात्वा पठन् पञ्चाक्षरीं सदा ।
पञ्चास्य गणनाथत्वं प्राप तं मुरुघं भजे ।। ४७
(अनुष्टुप्छन्दः । पुरातनस्य मुरुघस्य कथा)

सद्वंशोच्चरणीयेत्युद्धुष्यन्निव मुखेन यो वेणौ ।
पञ्चाक्षरीमवादयदानाय्नारशरणमहमीडे ।।४८
(आर्या । पुरातनस्य चोक्कनायनारस्य कथा)

गङाधरस्य कर्णे सङ्गीतसुधारसं समभिषेच्य ।
मङ्गळपदमभजत् यस्तं गणवरनीलकण्ठमहमीडे ।। ४९
(आर्या । तिरुनीलकण्ठाख्यस्य पुरातनस्य कथा)

वैमानिकानामपि दुर्विलोकं वै मानवानामुपनीय यागम् ।
सोमासितग्रीवमदर्शयद् यः सोमासिमारं तमहं भजेऽद्य ।। ५०
(इन्द्रवज्रावृत्तम् । पुरातनस्य सोमासिमारस्य कथा)

आम्नायशिरोगोचरमानीय भुवं भवं परमभक्त्या ।
यो हासयन् गणपदं लेभे करवूरिकारिमहमीडे ।।५१
(आर्या । पुरातनस्य करवूरिनाम्नः कथा)

भवभवनदीपपात्रे तैलाभावेऽभिषिच्य तीर्थजलम् ।
वर्तिं व्यदीपयद् यस्तमहं नेमिनन्दिनामकं वन्दे ।। ५२
(आर्या । पुरातनस्य नेमिनन्दिनः कथा)

यस्सन्ततं निजकटाक्षसुधाभिषेकैः
कर्तुं प्रवृत्त इव कण्ठगरोपशान्तिम् ।
तन्न्यस्तदृष्टिरगजारमणाङ्कवर्ती
तं नौमि रुद्रपशुपाभिधमुग्धभक्तम् ।। ५३
(वसन्ततिलकवृत्तम् । पुरातनस्य रुद्रपशुपतेः कथा)

अस्मत्पतिः खलु महान् गुणगर्भ ईश
स्पर्शक्षमस्त्वमयि को नु चलेति लिङ्गे ।

तं कीटमास्यमरुतेव निवारयन्त्याः
सत्याः पतिं हृदि भजे तिरुनीलनक्कम् ।। ५४
(वसन्ततिलकवृत्तम् । पुरातनस्य तिरुनीलनक्कस्य कथा)

परीक्षायै भक्तैः प्रथममुपनीतं मणिमयं
त्यजन् मत्स्यं भूयस्तमुपगतमुत्सृत्य सरिति ।
पुनर्जालक्षेपक्षणबडिशलग्नं त्रिनयनं
भजन्मुक्तोऽभूद् यस्तमहमतिभक्तं हृदि भजे ।। ५५
(शिखरिणीवृत्तम् । पुरातनस्य अतिभक्तस्य कथा)

वागीशं गिरिश इति प्रकृष्टभक्त्या
तत्पादाम्बुजमधिगम्य लब्धदीक्षा ।
कैलासक्षितिधरमारुरोह या ताम्
आपूतिं भुवि परिपूर्तिमहमीडे ।। ५६
(प्रहर्षिणी वृत्तम् । पुरातन्याः आपूतेः शिवशरणायाः कथा)

द्यूतार्जितद्रविणमीश्वरभक्तितृप्त्यै
भक्त्योपयुज्य निजवासमुपागतेन ।
द्यूतं हरेण कलयन्नहरत् समर्थं
सन्ताड्य यस्तमहमच्युतभक्तमीडे ।। ५७
(वसन्ततिलकवृत्तम् । अच्युतभक्ताख्यस्य पुरातनस्य कथा)

परशिवचरणाम्भोजं
परितर्प्य च परं त्रिभिः करणैः ।
स्थिरसुखमवाप यस्तं
चिरुपुलियाण्डं भजे गुणकरण्डम् ।। ५८
(आर्या । पुरातनस्य चिरुपुलियाण्डस्य कथा)

परान् जेतुं युद्धे कलय चतुरङ्गानिति धनं
प्रदत्तं यद् राज्ञा तदखिलमभीतश्शिवपदे ।

समर्प्याजस्रं यश्चरचरणपूजामतिरभूद्
उदारं तं धीरं मोनेयिड्डमारं हृदि भजे ।। ५९
(शिखरिणीवृत्तम् । पुरातनस्य मोनेयाण्ड इति ख्यातस्य मोनेयिड्डमारस्य कथा)

हरशरणेभ्यो दत्वा धरणिपतित्वं परं पदमवाप्य ।
चरितार्थोऽभूद् यस्तं परमं पेरुमाळेभक्तमहमीडे ।। ६०
(आर्या । पुरातनस्य पेरुमाळेभक्तस्य कथा)

आशान्तमाशु वित्तैराशाम्बरभक्तसन्ततेः कुर्वन् ।
योऽशेषनुत्यसुयशो राशिरभूत्तं भजामि नरसिङ्गम् ।। ६१
(आर्या । पुरातनस्य नरसिङ्गस्य कथा)

दातुं स्वर्णानि चेतोभवसमरभरश्रान्तयद्वारकान्ता–
वक्षोरुड्वामलूरुप्रसरदहिवरां चक्षणा भ्रान्तिमाशु ।
तन्वन् सौवर्णकान्तिप्रसरविलसितोदस्तहस्ताम्बुजेन
प्रत्यक्षोऽभून्महेशस्तमनुपमगुणं सुन्दरं नम्बिमीडे ।। ६२
(स्रग्धरा । सुन्दरनम्बिनामकस्य पुरातनस्य कथा)

नम्बिनः शम्भुपादावलम्बिनः प्रभवोऽभवत् ।
यस्तं जडयेनैनारं निस्तुलं संस्तुमो वयम् ।। ६३
(अनुष्टुप् छन्दः । पुरातनस्य जडेयनायनार् नाम्नः कथा)

यस्याः पुत्रीभूय स नम्बी भुवि साम्बं
वश्यं कृत्वा मुक्तिमुदारामभजत् ताम् ।
पश्चात्फालश्रीपदपाथोरुहभृङ्गीं
यस्यज्ञानीनामकदेवीमहमीडे ।। ६४
(मत्तमयूरवृत्तम् । पुरातन्याः यस्यज्ञानीदेव्याः कथा)

पुरतस्सुन्दरमूर्तेः करधृतकेतुर्मृदाभ्यगच्छद् यः ।
पेरुमाळवियकुरम्बं स्मरामि संसुखितशरणनिकुरम्बम् ।। ६५
(आर्या । पुरातनस्य पेरुमाळवियकुरम्बस्य कथा)

मद्भक्तो यस्य मत्तोऽप्यधिक इति वदन् स्वीयभक्तावमानं
कुर्वाणेनाद्य सख्यं कथमकृत हरस्सुन्दरेणामुनैव ।
दूरे स्यातामतस्ताविह गणसमितेरित्यरं ताडयित्वा
घण्टां प्रायोजयद् यः पुनरपि मेरेमिण्डं तमुद्दण्डमीडे ।। ६६
(स्रग्धरावृत्तम् । पुरातनस्य मेरेमिण्डदेवस्य कथा)

सीमन्तभुवि चरन्तौ श्रुतियुवतीनां महेशितुश्चरणौ ।
भुवि सञ्चरितवानिति नम्बिनि कुपितं नमामि कालिकामम् ।। ६७
(आर्या । पुरातनस्य कलिकामस्य कथा)

उक्त्वा गच्छाम्यहं ते हर धरणिधरायेति तन्वन् प्रतिज्ञां
मां विस्मृत्यैव यातस्सममिति कलयन्नम्बिकृत्ये विडम्बम् ।
सैन्यैः साकं पुरारेः पुरवरमविशद् यः सदारः पुरैव
ध्याये तं चेरमाख्यं स्वमहिमविवशीभूतनम्बिप्रमुख्यम् ।। ६८
(स्रग्धरा । पुरातनस्य चेरमाख्यभक्तस्य कथा)

शिवशरणपदाब्जन्यासवत्यां पदाभ्यां
मयि यदि विचरन्त्यां दुष्कृतं स्यात् पदव्याम् ।
इति विनमितमूर्ध्ना या चचार क्षितौ ताम्
अनुपदमभिवन्दे कारिकालम्मदेवीम् ।। ६९
(मालिनीवृत्तम् । पुरातन्याः कारिकालम्मादेव्याः कथा)

ये या भूतभवद्भविष्यदगजाधीशाङ्घ्रिपूजोत्सुका
ये याश्शम्भुकृपाम्बुसेकफलितानर्घापवर्गद्रुमाः ।
ये याः श्रीगुरुलिङ्गजङ्गमपदाम्भोजैकपूजोत्सुका-
स्ते ताश्चारचयन्त्वनन्यशरणं मां पूर्णकामं भुवि ।। ७०
(शार्दूलविक्रीडितवृत्तम् । कवेः प्रार्थना)

भक्त्या त्रिषष्टिकगणाळिसुवृत्तरम्याम्
एनां स्तुतिं जगति येऽनुदिनं पठन्ति ।

ते तत्प्रसादपरिपाकमयीं निजेष्टां
सिद्धिं भजन्ति सुतरामितरानपेक्षम् ।। ७१
(वसन्ततिलकवृत्तम् । फलश्रुतिः)

इति अभिनवकालिदासबसवप्पशास्त्रिविरचितः त्रिषष्टिपुरातन-गणस्तवः समाप्तः ।

अस्य ग्रन्थस्य पठनेन कर्तुः वीरशैवमतनिष्ठा स्पष्टं व्यज्यते । गुरुलिङ्गजङ्गमानां विषयेऽचला भक्तिर्वीरशैवमतस्य मुख्यं तत्त्वम् । तत्र पुरातना बहवो द्रविडदेशोद्भवा भक्ताः । तेषां नामानि तद्भाषानुगुण्येन वर्तन्ते । तत्रैकारौकारौ ह्रस्वावपि भवतः । तस्मादत्र पद्येषु तदक्षरद्वयं छन्दोऽनुसारेण तत्र तत्र ह्रस्वरूपेण पठितव्यम् । अन्यथा छन्दोभङ्गभ्रमः स्यात् ।

शिवाष्टकम्

बसवप्पशास्त्रिकृतिषु शिवाष्टकं विशिष्टं स्थानमश्नुते । अत्राष्टौ पद्यानि मत्तेभाख्ये च्छन्दसि निबद्धानि । मत्तेभाख्ये तभयजसरनगयुक्तं स्वरार्थफणिभिन्नम् इति तल्लक्षणं भणन्ति । अस्यैव च्छन्दसः द्वितीय-नवम-षोडशाक्षरेषु प्रासो यदा भवति तदा अश्वधाटीति नाम लोके प्रसिद्धम् । भाषाप्रभुत्वं साधितवन्त एव कवयः तथा पद्यरचनां कर्तुं शक्नुवन्ति । बसवप्पशास्त्रिणः प्रतिभाविशेष एवमपि उज्ज्वलो द्योतते । इष्टदेवतायाः स्तवे उत्सहमानः कविरयं विशिष्टया रीत्या शिष्टान् अत्र तुष्टान् हृष्टांश्च करोति पुष्ट्या शब्दरचनया । संस्कृतरसविद आस्वादयन्तु-

वन्दारुवासवमुकुन्दाब्जसूनुमुखबृन्दारकौधमकुटी-
कुन्दारविन्दनवमन्दारमाल्यमकरन्दाभिषिक्तचरणम् ।
स्कन्दाग्रजाय गणवृन्दाधिपत्यवरसन्दायकं नगसुता-
नन्दाब्धिचन्द्रमिह वन्दामहे शिवममन्दानुकम्पमनिशम् ।। १

हालाहलाऽपि बत लीलासिताम्बुरुहमालायितस्तव गले
शैलात्मजाकमलफालान्तरे ज्वलितकीलानलस्तिलकितः ।
बाला वयं किमु तवालाघवं चरितमालापितुं ततधियः
शैलादिमुख्यगणजालाभिनन्द्यगुण कैलासगोत्रवसते ।। २

वित्ताधिपे तव सुहृत्ताङ्गतेऽपि धृतकृत्ताजखर्परकरः
छेत्तापि चित्तभवसत्तातरोस्त्वमसि दत्ताङ्को गिरिभुवे ।
तत्तादृशातुलितवृत्तानि वक्तुमनुदत्ता भवन्ति मुनयो
मत्ता वयं क्व भवमुत्तारय त्वमनिमित्तानुकम्प गिरिश ।। ३

दारास्सुता लसदगारादयो जगति कारा इति श्रुतिधियो
धीरास्तरन्ति भवनीराकरं शिव समाराध्य तेऽङ्घ्रिकमलम् ।
जारा वयं स्मरविकारान्विताः कथमुमाराजिताङ्कसुकृत-
द्वारा विशेम विधिनारायणेड्यपद ताराचलं तव विभो ।। ४

पापीति मय्यधिककोपी तु मा भव कलापीकृताहिवितते
व्यापीतदोषमनुजापी वदाद्यपरितापी भवेद् भुवि कथम् ।
स्वापी किमाश्रितमनःपीडनं हरसि नो पीनमाशुभुवन-
व्यापी त्वमेव हि न कोऽपीशिता शशिकलापीड पाहि शिव मे ।। ५

पूर्णानुरागवदपर्णानुरञ्जनविशीर्णार्धदेह भवतः
स्वर्णाद्रिराप बत कर्णान्तिकं तव सुपर्णासनः किमिषुताम् ।
तूर्णालिकानलविकीर्णाः पुरोभसितचूर्णायितास्तव पुर-
स्तार्णा इवारिजयनिर्णायकस्यनु तीर्णापदो दिविषदः ।। ६

दक्षाध्वराधिक बुभुक्षावसद्दिविजशिक्षाविचक्षणमतिं
द्राक्षासुधारससदृक्षाद्रिजावचनभैक्षातिथिश्रुतिपुटम् ।
रक्षाजनिप्रलयदीक्षाविधायकनिजाक्षाननं त्रिजगतां
मोक्षाय मानस महोक्षासनं भज जिताक्षार्जितं पशुपतिम् ।। ७

वादाय किं विदितवेदागमाहृदयतोदाकरैर्हतबुधै-
र्यो दास्यतीह गतभेदामृतं जगति पादाम्बुजाश्रयजुषाम् ।
श्रीदार्चितं जगदुपादानमाश्रितमहोदारमाश्रय चिरं
तादात्म्यमेत्य भवभेदावलेस्तमपनोदाय मानस शिवम् ।। ८

एतन्यष्टौ पद्यानि बसवप्पशास्त्रिपाण्डित्यद्योतकानि । प्रतिदिनमेतेषां पठनेन नूतनेषु प्रकारेषु पद्यं रचयितुं वाचकानां च चेत उत्सहते ।

इति बसवप्पशास्त्रिविरचितशिवाष्टकं समाप्तम् ।

शिवभक्तिसुधातरङ्गिणी

श्री बसवप्पशास्त्रिणः कृतिषु प्रमुखेयं कृतिः । तस्य परिपक्वायाः प्रतिभायाः फलमिति वक्तुं मन इच्छति । गैर्वाण्या वाण्याः स्वादिमानं ज्ञातुं पठनीयानि अत्रत्यानि पद्यानि । आस्वादयन्तु सहृदयाः ।

सकलागमसन्दोहशुक्तिसम्पुटमौक्तिकम् ।
गिरिजामातरं वन्दे गिरिजामातरं च ताम् ।। १

(गिरेर्हिमालयस्य जामातरं, गिरिजारूपां मातरं च वन्दे इति सचमत्कारमाहात्र कविवरेण्यः)

शम्भोः सम्भोगसौभाग्यं शम्बराराविजीवितम् ।
सम्भावये महः साक्षात् कुम्भिनीध्रतपःफलम् ।। २

स्रग्धरा

वन्दे नन्दीशमुख्याः प्रमथपरिवृढा यस्य पादाम्बुजाश्चद्-
भक्तिश्रीपारवश्यादविदितभुवनानल्पकल्पा जयन्ति ।
तं देवं सर्वभूतोत्करहृदयगुहान्तःस्थपञ्चास्यमाद्यं
हृद्यं वामाङ्कपीठस्थितगिरितनयालिङ्गितं सङ्गमेशम् ।। ३
(परिवृढा नायकाः । उत्करः समूहः । पञ्चास्यः शिवः, सिंहश्च ।)

शिखरिणी

नमस्ताभ्यां याभ्यां जगदखिलसृष्टिस्थितिलय-
क्रियास्सम्पद्यन्ते हरिविधिपुरोगामरगणाः ।
ययोः पादाम्भोजद्वयनियतनीराजनविधिं
नमत्कोटीराञ्चन्मणिघृणिगणैस्संविदधते ।। ४
(कोटीरं किरीटं, घृणिः किरणः)

स्रग्धरा

प्राप्तो यस्याङ्घ्रिपद्माश्रयमपि परमो हंसकोऽभूद् भुजङ्गः
पाणिस्पर्शेन वीणा व्यजनि सुनिगमाशंसिसत्तन्त्रिकाढ्या ।

इन्दुर्दोषाकरोऽपि स्वपरिचयवशान्मूर्ध्नि जातोऽकलङ्कः
सोऽस्मान् अज्ञान् अभिज्ञान् रचयतु दयया दक्षिणामूर्तिरीशः ।। ५
(हंसकः पादवलयः । दोषाकरः दोषाणाम् आकरः)

शिखरिणी

पदं यत्ते चित्ते चकितमभिधत्ते श्रुतिरत-
स्तदुद्गातुं ज्ञातुं प्रभवति न हातुं मम मनः ।
तथाप्येषा भाषा मुखरयति तोषात् किमिति माम्
उमाजाने जाने न खलु ,मयि दीने कुरु कृपाम् ।। ६

पुराराते या ते तनुरखिलमातेत्यनुपदं
गिरस्सूते प्रीते त्वयि नियमिगीते श्रुतितति: ।
क्रियात् सा नो दीनोत्करदिविजधेनो पशुपते
सदाशेषं तोषं भुवि गलितदोषं करुणया ।। ७

गले क्ष्वेलं शूलं कमलजकपालं करयुगे
पदेऽहीन्द्रं चन्द्रं शिरसि रुचिसान्द्रं शिखरिजाम् ।
वहन्नङ्के पङ्केरुहदृशमनङ्के कलयसे
कदा शम्भो डिम्भोपरि तव कराम्भोजमभयम् ।। ८

(अहीन्द्रः सर्पराजः । शिखरिजा पार्वती । डिम्भः शिशुः ।)

जगन्नेत्रं गात्रं शिव तव कलत्रं त्रिजगती-
महामाता नेता त्वमसि पुरुहूतादिमरुताम् ।
अतो याचे नीचेतरदिह दया चेन्मयि सुखं
कृपासिन्धो बन्धो दिश गलितबन्धोऽस्मि भुवने ।। ९

शिवाकान्तं शान्तं पदहतकृतान्तं श्रुतिनुतं
कृपापाङ्गं तुङ्गं करधृतकुरङ्गं पशुपतिम् ।
जगत्सेव्यं भव्यं मुनिभिरनुभाव्यं हृदय रे
शिवं स्मारं स्मारं भवजलधितीरं गमय माम् ।। १०

स्मरोदारैदरैः कृतगृहविचारैर्विहरता
मया स्वार्थाः पार्थास्त्रद न च परार्थाश्च गणिताः ।
गतः कालो बालोचितकुमतिमालोक्य कृपया –
ऽपराधं नो त्वं नो गणय सुविपन्नोत्सुक विभो ।। ११

(दारैः पत्न्या । दाराः पुंसि च भूम्न्येव । पार्थास्त्रद पार्थाय अर्जुनाय अस्त्रं दत्तवान् पार्थास्त्रदः । तत्सम्बोधनम् । नो इति नकारार्थमव्ययम् । नः अस्माकम् ।)

वधूलीलाडोलाविहरणविलोला बत वयं
भृशं भ्रान्तास्तान्ता विपदमपि चिन्तामभिगताः ।
तवाधीना दीनावनकृतिरनूना खलु यतः
ततोऽस्माकं शोकं प्रशमय विवेकं दिश विभो ।। १२

मया काले फालेक्षण परमलोलेन मनसा
तपोभाजा पूजा तव जगति नो जात्वपि कृता ।
यथापत्यं सत्यं गणय तव भृत्यं त्वमव मां
पुराराते भीते मयि कुरु सदा तेऽधिककृपाम् ।। १४

(फालेक्षण निटिलाक्ष । जात्वपि कदाचिदपि । पुराराते हे त्रिपुरशत्रो ।)

मयायत्तं चित्तं वपुरपि च वित्तं विनिहितं
पदाम्भोजे बीजे भुवनतरुराजेस्तव विभो ।
ददत् तुष्टिं पुष्टिं रचय मयि दृष्टिं सकरुणां
भवद्भक्तिं मुक्तिं दिश मधुरसूक्तिं तव नुतौ ।। १५

(आयत्तम् अधीनम् । भुवनतरुराजेः प्रपञ्चरूपस्य वृक्षसमूहस्य बीजे मूलकारणे । ददत् ददानः । नुतिः स्तुतिः।)

सदुर्वासा व्यासादिममुनिसभा साम्बशिव ते
न पारम्यं रम्यं गणयितुमगम्यं प्रभवति ।
मम त्वेषा शेषाञ्चितपद मनीषा कथयितुं
महौत्सुक्याच्छक्या न तदुचितवाक्याच्छृणु विभो ।। १६

(शेषाञ्चितपद सर्पालङ्कृतपाद । मनीषा बुद्धिः ।)

तवैवास्ते हस्ते पुरहर नमस्ते मदवन-
क्रिया लोकेऽस्तोके कमपि न विलोके त्वदितरम् ।
ततः श्रुत्वा सत्त्वाश्रय तव महत्त्वाश्रितनुतिं
मदीयां भो शम्भो दिश निजपदाम्भोजभजनम् ।। १७
(अस्तोके विशाले । न विलोके न पश्यामि)

पदं चित्ते धत्ते य इह भुवि वित्तेशसख ते
सतां मान्यो धन्यो भवति च जघन्योऽपि सहसा ।
अतो ध्याये ध्येये मनुमुनिनिकायेन च भव-
त्पदे भूयो भूयोऽचिरमिव विधेयोऽ यमिति माम् ।। १८
(वित्तेशसख कुबेरमित्र । जघनमिव जघन्यः । अधम इत्यर्थः । निकायेन समूहेन ध्येये ध्यानविषयीकार्ये ।)

नमत्तण्डो खण्डोडुपधर मृकण्डोस्तनुभुवं
पुराकाले काले व्यथयति निटालेक्षण तदा ।
यमं हत्वा दत्वाऽभयममलसत्त्वाय ददती
चिरायुष्यं प्रेष्यं तव विनुतिपोष्यं ननु कृपा ।। १९
(तण्डुर्नन्दी । तण्डुना नम्यमानेत्यर्थः । उडुपः चन्द्रः । खण्डोडुपधर चन्द्रकलाधर । मृकण्डोः तनुभुवं पुत्रम् । मार्कण्डेयमित्यर्थः । निटालं फालः । निटालेक्षण फालाक्ष । प्रैष्यः सेवकः ।)

सकैलासो वासो निजचरणदासोऽस्य य इह
प्रभोर्यत्र स्तोत्रक्रम इह परत्र प्रकटितः ।
न मे मोक्षापेक्षा मयि यदि कटाक्षास्तव परं
तदापाङ्गं तुङ्गं कृतजनिविभङ्गं वितर भो ।। २०
(कृतजनिविभङ्गं जन्मनिवारकम् । अपाङ्गः नेत्रान्तभागः ।)

नभोऽरण्या गण्या प्रवहदुरुपुण्यामरसरि-
ज्जटामल्लीवल्लीस्फुटसुममतल्लीव विधृता ।

त्वयेत्यास्तां शम्भो त्वदनुचरकुम्भोद्भवमुनिः
पुरा पारावारं करकमलमारन्दमकरोत् ।। २१

(अमरसरिद्गङ्गा । सुममतल्ली श्रेष्ठं पुष्पम् । कुम्भोद्भवमुनिरगस्त्यः । पारावारः समुद्रः । मारन्दं मकरन्दमकरोत् ।)

अपि क्रोधस्थानं तव तु चतुरास्यो जडजजो
जनः प्रेमस्थानं शिव भवति सर्वज्ञ इति यत् ।
किमाश्चर्यं कार्यं निगमवचसामप्यविषयाः
क्व ते भूमानस्तत्कथनविषयेऽहं क्व लघुधीः ।। २२

(जडजजः जलजजः । पद्मभूः ब्रह्मेत्यर्थः । भूमानः प्रभावाः । विषमालङ्कारः ।)

श्रुतिस्त्रीसीमन्तस्थलविमलमुक्तामणिरयं
नखस्ते पादाब्जस्रवदमृतबिन्दुभ्रमपदम् ।
अपौनर्भव्यं द्राग् दिशति नत वृन्दाय च पुन-
र्भव त्वं यत्तस्मिन् गिरिश तदिदं विस्मयपदम् ।। २३

(सीमन्तः केशवेशः । श्रुतिस्त्रीसीमन्त इत्यस्य वेदान्त इत्यर्थः अपौनर्भव्यं मोक्षं, द्राग् अञ्जसा, दिशति वितरति ।)

विटोऽयं मत्पादाम्बुरुहघटना नास्य विहिते-
त्यलं नोपेक्षेथाश्चरणशरणं मां वरयितुम् ।
भुजङ्गव्यासङ्गो वलयितफणाभृत्परिवृढ-
प्रबद्धाङ्घ्रेश्शम्भो तव न खलु तत्त्वं कथय नः ।। २४

(भुजङ्गव्यासङ्गः विटसम्पर्कः । सर्पसम्बन्धश्च)

प्रभुः स्यामेकोऽहं नमदवनकार्येष्विति मुदा
निबद्धं पादाब्जे नवनटनशीलस्य भवतः ।
पदाग्राद् भ्रष्टं किं बिरुदकटकं तन्न यदि चेत्
कथं मां विस्मृत्य स्वपदभजकं त्वं विहरसि ।। २५

गुरुत्वं ते नन्दी निजभुजबलं मेरुशिखरी
निटालाक्षणस्तैक्ष्ण्यं त्रिपुरदनुजाश्चापि मदनः ।

विधिर्विष्णुर्युष्मन्निरपमितशीर्षाङ्घ्रियुगला-
प्रमेयत्वं प्राहुस्त्रिनयन वयं त्वद्घनदयाम् ।।२६

(निटालाक्ष्णः फालनेत्रस्य । मेरुशिखरी मेरुपर्वतः । त्रिपुरसंहारवेलायां शिवेन मेरुपर्वत एव चापः कृतः इति पौराणिकी कथा । एवं शिवलिङ्गस्य शीर्षमङ्घ्रिं च द्रष्टुं प्रयत्य विधिविष्णू विफलौ जाताविति कथा ।)

अयं पापीति त्वं त्यजसि यदि मां तावकपद-
स्मृतिः किं पापौघं न हरति हर त्वं कथय मे ।।
तथाप्येको दोषो मम निजपदाब्जस्मृतिमतः
पुनर्दैन्यं वाचि स्फुरति हर नः पापमिति यत् ।। २७

शशी दोषाविष्टे मयि वदति ते पापमखिलं
सखेदं ते भिन्दन् दिशति सुखमव्याजकरुणः ।
कृशीभूतं यो मां बत जगति दोषाकरतया
यतोऽकार्षीच्छीर्षे स च न किमु दीनावनपरः ।। २८

नमद्बाधालोकाक्षममपि भवत्पादयुगलं
गिरीशाभून्नारायणनयननालीककलितम् ।
न चेत् को वाक्षेपं कलयति न मां सान्त्वयति चे-
दितो दूये ध्याये तदहमनुपायेन मनसा ।। २९
(नारायणस्य नयनमेव नालीकं कमलं, तेन कलितं पूजितम् ।)

अपि स्वामिन् शीर्षे शशधरकलाशालिनि परं
प्रसूनं धत्तूरं सुरभिलमधूकं कलयतः ।
तव प्रायस्सद्भिर्भवदपि सुगम्यं पदमहो
किमस्माभिः प्राप्यं न भवति कृपालो कथय नः ।। ३०
(प्रसूनं पुष्पम्)

इदं ते वैयाघ्रं कटितटगतं चर्म च करे
कपालं वैरिञ्चं चरणघटितश्शेषकटकः ।

त्रिशूलं चास्माकं दरयति न चेतस्तव भवे-
दुपेक्षा चेद्दीने मयि गिरिश भीतोऽस्मि च तदा ।। ३१
(व्याघ्रस्येदं वैयाघ्रम् । विरिञ्चेरिदं वैरिञ्चम् । दरयति भीतियुक्तं करोति ।)

शिलाघातैस्साङ्ख्यः प्रचुरशरपातैश्च विजयः
कथं वा शम्भो त्वामसुखयदजस्रं सुमनसाम् ।
सहस्रं त्वत्पादेऽप्यपि हर समर्प्य प्रणमतो
न मे वार्तां किञ्चिन्निशमयसि नो सान्त्वयसि च ।। ३२

त्वया साकं योद्धुं हर परमपार्थः किल शिला-
मसाङ्ख्यः प्रक्षेप्तुं नियतमबलाढ्यस्तव पुरः ।
न नन्दी त्वामानन्दयितुमिह कारुण्यजलधे
पशुं मां पाहीश त्वमसि यदि सत्यं पशुपतिः ।। ३३

ग्रहीतुं मच्चेतश्चपलहरिणं दीपकमृग-
स्त्वया हस्ते न्यस्तः किमु गिरिश नो चेद् यदि तथा ।
कथं वा वातायुर्वद निखिललोकावनपदे
भवत्पाणौ शम्भो यदचपलवत्तत्र निवसेत् ।। ३४

विषाक्तैः पञ्चेषोरिव सुमशरैस्साञ्जनवधू-
कटाक्षैर्निर्भिन्नं हृदि सपदि मूर्छालुमिह माम् ।
समालोक्य स्वामिन्निरवधि निजापाङ्गविसरत्-
कृपावृष्ट्या दृष्ट्या मदनहर सञ्जीवय चिरम् ।। ३५

रसोपेतं चूतं फलमुपगतं वीक्ष्य पुरतः
किमस्वादुं चौदुम्बरमधरमाकाङ्क्षति शुकः ।
उमानाथे नाथे त्वयि सति दयार्द्रे मम मनो
विभोऽवन्यामन्यान् अजहरिमुखान् किं गणयति ।। ३६
(पादाद्यवयववर्णनम्)

सहायाता दैवैः किमु नतिपरैः स्वर्वनपिकाः
पदं तैर्दष्टं किं तव गिरिश चूताङ्कुरधिया ।

गतैस्सक्तं चञ्चा विधुतममरद्रौ किमु न चेत्
कथं तस्मिन् वाञ्छावितरणचणः पल्लवगणः ।। ३७

(स्वर्वनं स्वर्गोद्यानं , नन्दनवनमिति यावत् । अमरद्रौ कल्पवृक्षे । वितरणेन वित्तः प्रसिद्धः वितरणचणः । उत्प्रेक्षा ।)

श्रितास्त्वत्पादाब्जं किमु विमलमुक्ताः किमथवा
शिरोनृत्यद्गङ्गाजलकणगणाः पादपतिताः ।
किमस्मद्रक्षाधूर्वहनभवघर्माम्बुपृषता
इति ज्ञेयाश्शम्भो तव पदनखाः पान्तु सुमुखाः ।। ३८

(घर्माम्बु स्वेदः, पृषताः बिन्दवः)

सरोजं साधूनां हृदयसरसश्चिज्जलनिधे-
रिदं कूर्मः कुर्मः प्रणतिमवतान्नस्तव पदम् ।
त्रयस्त्रिंशत्कोटित्रिदशनवमाणिक्यमुकुटी-
लसच्छाणोल्लीढः स्फुरति नितरां यन्नखमणिः ।। ३९

(भगवतः पदं साधुहृत्सरसः कमलमिव, ज्ञानसमुद्रस्य कूर्म इव वर्तते । तस्य नखरत्नं त्रिदशानां देवानां मुकुटीसहस्ररूपेण शाणेनोल्लीढः स्फुरति ।)

परं निर्वाणश्रीविहरणपदं संयमिमन-
स्सरोवासं दोषाकरनयनदुर्दर्शविभवम् ।
गुणाढ्यं यद् भृङ्गीहितकरमुपाक्रान्तभुवनं
मनोऽळेरामोदं वितरतु पदाब्जं तव विभो ।। ४०

(निर्वाणश्रीः मोक्षलक्ष्मीः, तस्या विहारास्पदम्। संयमिनः संन्यासिनः,तेषां मनांस्येव सरांसि, तत्र वासो यस्य तत् । मन एवालिर्भृङ्गः, तस्यामोदं परिमलं वितरतु ददातु ।)

अदूरं सिन्दूरं श्रुतियुवतिसीमन्तसरणेः
विमुक्तिश्रीवक्षोघटितपटवासोऽद्भुतमिदम् ।
वहन्तो यं मूर्ध्नि त्वरितमपरागा भुवि जनाः
स नः श्रेयो दद्यात्तव पदपरागः पशुपते ।। ४१

(पदपरागः पादधूलिः । शिवपदपरागम् अपरागाः वीतरागाः मूर्ध्नि वहन्ति । सोऽस्माकं श्रेयो दद्यात् ।)

पुनात्वस्मान् शम्भो तव पदसरोजं वलयितः
शुचिश्शेषो यस्मिन् त्रिजगदघसंहारनिपुणे ।
नखाञ्चन्नैर्मल्यं तव शिरसि राजत्सुरसरित्-
प्रभा केशाकेशि क्षपयतु ममान्तःस्थतिमिरम् ।। ४२

भवेतामन्योन्योपमितिमधुरौ निस्तुलतया
तवोरू नश्शम्भो शुभविभवदौ चारुमृदुलौ ।
जिता रम्भा याभ्यां कृतवननिवासा मुकुलित-
प्रसूनव्याजेनाञ्जलिमिव निबध्नन्ति विनताः ।। ४३

(रम्भाः कदलीवृक्षाः । प्रसूनव्याजेन कुसुमकैतवेन ।)

वलग्नं नः क्षेमं दिशतु तव पञ्चास्य हिमवत्-
सुतामुष्टिग्राह्यं फणिपरिवृढः सारसनताम् ।
त्वया नीतो दीव्यन्निजफणमणीदीपरुचिभि-
र्निजाधारं यस्मिन्मुहुरपनिमेषो मृगयते ।। ४४

(वलग्नं मध्यम् । पञ्चास्य हे शिव । फणिपरिवृढः सर्पराजः । सारसनं मेखला । अपनिमेषः निर्निमिषः)

भवन्नाभिर्भव्यं भव वितरताच्चिज्जलनिधे-
र्गभीरावर्तो नस्त्रिभुवनसमावेशनबिलम् ।
उरोभूषानन्तो यदनुपमचारित्रकथने
रसज्ञाबाहुल्यं सफलमिति सन्तोषमयते ।। ४५

(आवर्तोऽम्भसां भ्रमः । उरोभूषा वक्षस आभरणम् । अनन्तः सर्पः । रसज्ञा जिह्वा ।)

शार्दूलविक्रीडितम्

नित्यं सारसनीभवत्फणिफणामाणिक्यदीपाञ्चल-
प्राञ्चत्कज्जलरेखिका किमुरसि व्याप्ता च रेखात्मना ।

स्विन्नाद्रीन्द्रसुताकुचान्तरगलत्कस्तूरिकाकर्दमो
वा स्यादित्यनुमेयरोमलतिका सोमेश ते पातु नः ।। ४६

शिखरिणी

वलक्षं ते वक्षस्सुखयतु दृशौ दक्षतनया-
वलद्वक्षोजान्तर्मसृणघुसृणक्षोदरुचिरम् ।
उरोभूषाहीनां फणमणिभिरुग्रं शशिकला
कवाटं चित्कान्तागृहगतमिवाभाति यदहो ।। ४७

(वलक्षं धवलम् । वक्षोजौ स्तनौ । मसृणं स्निग्धम् । घुसृणक्षोदः कुङ्कुमचूर्णम् । अहीनां सर्पाणाम् ।)

स नः शम्भो कम्बोर्महसि सविडम्बो निजरुचा
निकामं नः क्षेमं भुवि दिशतु ते मङ्गलगलः ।
मृडान्या यन्नैल्यं नखविलिखितेवाञ्जनरसै-
र्दृशोर्लीलोदञ्चद्गरलजयलेखा विजयते ।। ४८

(कम्बोः शङ्खस्य । महसि कान्तौ । गलः कण्ठः । मृडान्या पार्वत्या । गरलं विषम् ।)

हिमक्ष्माभृत्कन्यासततभुजविन्यासजनितः
किणो वा शैवालं दिविजसरिदालम्बि वलितम् ।
इति क्ष्वेलं मन्ये तव गिरिश नो चेद् यदि तथा
कथं ज्योत्स्नासारं विकिरति मदीयाक्षियुगले ।। ४९

(किणः व्रणचिह्नम् । आसारो धारासम्पातः)

फणानां साहस्रे क्षितिधुरमहीन्द्रो वहति तं
भुजे भूषाव्याजाद्वहसि शिव नैवाद्भुतमिदम् ।
चिरादुर्वीं गुर्वीमपि जगति यस्यैव शिशुका
भुजैर्नैजैर्लीलामणिवलयवद् बिभ्रति मुदा ।। ५०

फणाशस्तौ हस्तौ वलयितफणीशस्य वरदौ
भवेतां नश्शम्भो मणिमुकुरजानुप्रणयिनौ ।
भवानीवक्षोजद्वयघुसृणपङ्काविलतया
लसन्तौ संरक्ताविव युधि लतान्तैस्सुरतरोः ।। ५१

वंशस्थवृत्तम्

भुजङ्गकेयूरमनोहरौ भुजौ
विभो भवेतां शुभदौ तवातुलौ ।
विलोकयन् यौ परिरम्भिणौ ह्रिया
मुखेऽथ शुण्डां पिदधाति विघ्नराट् ।। ५२

शिखरिणी

क्रियादाह्लादं नस्तव वदनपूर्णेन्दुरधुना
स्मितज्योत्स्नासारस्नपितनतचेतःकुवलयः ।
कलङ्काभावात् त्वद्गलकलितनैल्याच्च कलये
यदङ्कः कल्लोलैरमरसरिता क्षालित इति ।। ५३

स्मितं ते मच्चेतः शिशिरयतु यद् भस्मितपुरं
पुरास्माकं पापान्यपि भसितसात्कृत्य लसति ।
उदञ्चद्गङ्गोर्मिस्फटिकमुकुटार्धेन्दुशकलो
यदस्मिन् बिम्बोष्ठे प्रतिफलित इत्येव लसति ।। ५४

स्थिता या वामोरौ हिमगिरिसुतायाः स्मितमिषा-
न्मुखाब्जेऽपाङ्गश्रीविहरणमिषादक्षिकुमुदे ।
विकासं यच्छन्त्यौ युगपदखिलेशाश्रयबला-
दभीष्टं नः शम्भो रविशशिदृशौ ते वितरताम् ।। ५५

चिरादम्बाबिम्बाधरमधुरसास्वादसमये
ह्रियोन्मीलद्दृष्टेर्गिरितनुभुवो वीक्षणकरम् ।
शुभं दद्याच्छम्भोर्निटिलनयनं मस्तकधुनी-
तरङ्गाधःक्षिप्तारुणसरसिजातभ्रमपदम् ।। ५६

समुत्पाट्य न्यस्तः करसरसिजे भर्तुरुमया
मुखेन्दोस्सारङ्गात्मकदृढकलङ्कस्तत इदम् ।
घनीभूतं रक्तं ध्रुवमिति जनानां विमृशतां
मतिं कुर्वद् यत्तद्दहतु दहनाक्षं पुरभिदः ।।५७
(पुरभिदः शिवस्य, दहनाक्षं वह्निरूपं तृतीयं नेत्रम्)

शार्दूलविक्रीडितम्

कर्णौ कुण्डलकुण्डलीश्वरशिरोरत्नांशुकीर्णाविमौ
शृण्वन्तावववतां ममेदमगजाजानेऽद्य दीनं वचः ।
वक्त्राम्भोरुहमध्यमञ्जुविहरद्वाग्राजहंसस्फुरत्-
पक्षक्षुब्धकटाक्षपूर्णकरुणास्रोतोभ्रमभ्रान्तिगौ ।। ५८

शिखरिणी

भवन्नासाश्वासानिलसुरभितां प्राप्य सुखित-
स्त्यजंश्चाम्पेयं यो विहरति स भृङ्गः खलु कृती ।
महेश त्वां वर्यं शरणमिति मत्वापि भुवि य-
स्त्वदन्यं दुर्बुद्ध्या बत भजति तस्मादपि जनात् ।। ५९

स्मितस्नाताः पूताः शिव तव रदाः पारदरुचः
क्रियासु श्रेयो नश्शिखरिवरजाताधरकृताः ।
लसद्वर्णोत्कर्षाः स्फुटनिगमसंस्कारविमलाः
द्विजाः प्रातस्साक्षादिव मुखभवा भान्ति ननु ये ।। ६०

क्रियास्तां कल्याणं शिव तव कपोलौ गिरिसुता-
रदाङ्कूरादंशव्रणकिणविशेषाञ्चिततया ।
किमु श्रोत्रोपान्ते च्युतचकचकत्कुण्डलिफणा-
स्फुटाञ्चन्निर्मोकद्वितयमतिशङ्कां विदधतौ ।। ६१

(कियास्तां कुरुताम् । आशीर्लिङ् । रदा दन्ता एव अङ्कूरा इति रूपकम् ।
निर्मोकः अहित्वक् ।)

वसन्ततिलकम्

मन्दस्मितं सितसितं तु बहिः प्रणीत-
मुक्तायते गिरिजया मुखमण्डनार्थम् ।
तच्छुक्तितल्लजमिवोल्लसितं दृशोर्न-
स्त्रैयम्बकं चुबुकमीप्सितमातनोतु ।। ६२

(मुक्तेवाचरति मुक्तायते । प्रशस्ता शुक्तिः शुक्तितल्लजम् । त्र्यम्बकस्येदं त्रैयम्बकम्)

फालं तवाद्य परिपालयतु प्रभो नः
प्रालेयभानुरिह दुर्ललितैस्तरङ्गैः ।
द्वेधा मया विदलितः किमितीव भीता
यं वीक्ष्य योजयितुमिच्छति मूर्ध्नि गङ्गा ।। ६४

(प्रालेयं हिमम् । भानुः किरणः । प्रालेयभानुश्चन्द्रः । दुर्ललितैः अनियन्त्रितैः)

शिखरिणी

अदभ्रं माङ्गल्यं वितरतु तव भ्रूयुगमिदं
जगद्रक्षाशिक्षाव्यवहृतिपदं मे पुररिपो ।
पुरा पुष्पास्त्रः स्वं धनुरपि यदालोक्य सहसा
त्रपाक्रान्तस्वान्तस्सभय इव तत्याज धरणौ ।। ६४

(अदभ्रं मितिरहितम् । माङ्गल्यं मङ्गलम् । पुष्पास्त्रः कामः । त्रपा लज्जा । स्वान्तं मनः)

क्रियासु क्षेमं नः शिव तव जटाः पाटलतराः
वतंसेन्दोस्सद्यस्तनकरकलापभ्रमकराः ।
शिरस्सिन्धोर्भूषाफणिमणिरुचो भान्ति ननु याः
प्रवालाश्शोणाभा इव रुचिरतीरस्थितिजुषः ।। ६५

(क्रियासुः कुर्युः । वतंसः शिरोभूषणम् । सद्यस्तनं तात्कालिकम् । शिरस्सिन्धोः गङ्गायाः । प्रवालाः विद्रुमाः । शोणाभाः रक्तकान्तयः ।)

वसन्ततिलकम्

त्वत्फालबालशशिनस्स्फुटचन्द्रिका नः
पुण्ड्रं करोतु भव भूतिकृतं विभूतिम् ।
उत्तंसचन्द्रकिरणोर्मिलशीर्षसिन्धो-
रापीनफेनमिति या भ्रममातनोति ।। ६६

(भूतिर्भस्म । विभूतिरैश्वर्यम् । उत्तंसः शिरोभूषणम् ।)

शिखरिणी

त्रिशूलं नः पायाच्छमनहृदयक्षेत्रहलवद्
यदाभात्यत्यन्तं करकमलमालम्ब्य रुचिरम् ।
शिखास्त्रिस्रो यस्य त्रिभुवनविभुत्वं तव परं
स्फुटीकुर्वन्तीश प्रणतमवतान्मां यमभयात् ।। ६७

(शमनो यमः । तस्य हृदयमेव क्षेत्रम् । तत्र हलवत् लाङ्गलवत् यदाभाति विराजते)

वसन्ततिलकम्

शार्दूलचर्म तव शर्मदमस्तु शम्भो
तत्कर्बुरांशुकतया विधृतं वलग्ने ।
यद्वीक्ष्य भीतिचपलोऽपि नियन्त्रितत्वा-
द्धस्ते चकास्ति चिरमुद्धृतमेणशावः ।। ६८

(शार्दूलो व्याघ्रः, तस्य चर्म कृत्तिः । शर्मदं सुखदम् । कर्बुरांशुकं चित्रवर्णं वस्त्रम् । वलग्नं मध्यम् । चपलः चञ्चलः । एणशावः मृगशिशुः ।

शिखरिणी

सभासद्भ्यस्तेभ्यः शिव तव गणेभ्यः प्रणमनं
वयं कुर्मः शर्मोदयमतुलमुद्दिश्य मनसि ।
अपि त्वां सर्वज्ञं गिरिश ननु विस्माययति यत्-
प्रसादो नैजाङ्घ्रिप्रणतजनताभीष्टवरदः ।। ६९

(सभासद्भ्यः सभ्येभ्यः । शर्मोदयं सुखकरम् । विस्माययति विस्मयवन्तं करोति ।)

किमास्ते सर्वज्ञे भव भवति विज्ञापनविधि-
स्त्वमेवास्माकं यद्वितर तदभीष्टं करुणया ।
नियुक्तः केनैवाखिलकुवलयाह्लादनकरः
स्वयं जीवञ्जीवं जगति ननु सोमस्सुखयति ।। ७०
(कुवलयं कुमुदम्, कोर्भूमेर्वलयं भूमण्डलं च । जीवञ्जीवः चकोरः ।)

शार्दूलविक्रीडितम्

सर्वज्ञे त्वयि तारतम्यविषयश्शम्भो न चेद्ब्रूहि नः
किं कुर्मो गुरुदारगामिनमपि स्वीकृत्य दोषाकरम् ।
उत्तंसीकृतवानसि स्वशिरसि स्वामिन् मयि स्वाश्रिते
दोषान् एष निजाश्रितेष्वनुचितस्ते पक्षपातक्रमः ।। ७१

आर्या

चित्रं त्वदङ्घ्रिचरितं हृत्वापि पुरा हरेर्नयनमेकम् ।
प्रददौ सुदर्शनं यत् सारससाहस्रपूजनावसरे ।। ७२
(सारससाहस्रं कमलानां सहस्रम्)

शिखरिणी

शिवानर्मालापैश्शिव किमु गणोक्तिप्रचुरितै-
र्हरिब्रह्मादीनां स्तवकलकलैर्वा दिविषदाम् ।
नटद्भृङ्गीशाङ्गीकृतभरतसङ्गीतनिनदै-
र्न मे दीनोक्तीस्ते निशमयितुमासीदवसरः ।। ७३
(नर्मालापाः विनोदवचनानि । दिविषदां देवानाम् । निशमयितुं श्रोतुम् ।)

तवापाङ्गास्तुङ्गाः कृतजनिविभङ्गाः प्रणमतां
महोदारा धाराभृत इव कृपाराशिशिशिराः ।
निरालम्बा लम्बाश्शशिकरकदम्बामलरुचः
पतन्तु द्राक्कन्तुप्रमथन वयं तु त्वयि नताः ।। ७४
(अपाङ्गाः कटाक्षाः । जनिविभङ्गः जन्मोच्छेदनम् । कन्तुर्मन्मथः । कन्तुप्रमथनः शिवः ।)

विभो कर्ता भर्ता त्वमसि परिहर्ता च जगतां
महान् नेता दाता च विधिपुरुहूतादिमरुताम् ।
कृपालोको लोकोदर फणितुलाकोटिपद ते
क्रियाद् भक्तिं मुक्तिं मम मधुरसूक्तिं तव नुतौ ।। ७५
(कृपालोकः करुणाप्रकाशः । तुलाकोटिर्नूपुरम् ।)

सतां त्राता दाता सकलगणनेता गुणनिधिः
सदानन्दी नन्दीश्वरवचनवृन्देडितपदः ।
क्षमाकान्तः शान्तः पदधृतकृतान्तः प्रणमतां
मरुद्रक्षस्त्र्यक्षः श्रितशरणपक्षस्समवतात् ।। ७६

(सतः सज्जनात् आनन्दयतीति सदानन्दी । क्षमया सहनया कान्तः सुन्दरः । मरुतां देवतानां रक्षः रक्षकः । समवतात् संरक्षतु ।)

कदा वा वामोरुस्थितगिरिसुतादर्पणलसत्–
कपोलेन्दौ चिह्नं किमपि जनयन्तः स्वरुचिभिः ।
कटाक्षास्ते शश्वन्मदुपरि पतेयुः पशुपते
दृशाकीर्णाः पूर्णाः इव हृदि चिरादूर्मिलकृपाः ।। ७७

असारे संसारे बत जलनिधौ मग्नमगतिं
प्रभो त्वत्पादाब्जाश्रयनिरतमालोक्य पुरतः ।
त्वमेवोपेक्षेथा यदि शिव मदुत्तारणविधा–
वहो किं ते न स्यादुडुपवहनेनाफलवता ।। ७८
(उडुपवहनेन चन्द्रस्य धारणेन)

स्रग्धरा

नाके सम्प्राप्तशोके सपदि बलिगृहे दुर्ग्रहे दाहभीत्या
भूलोके दुर्विलोके कलशजलधिभूरुद्भटः कालकूटः ।
कण्ठे कस्तूरिकाश्रीरिव ननु धृत इत्यद्भुतं किं त्वयास्ता–
मेतत् त्वद्भक्तिभाजामपि विषममृतं यद्भवत्येव शम्भो ।। ७९

पृथ्वीवृत्तम्

चराचरजगद्गुहाविहरदुग्रपञ्चानने
त्वयि स्फुरति सङ्गरे प्रधन बन्धुरः सिन्धुरः ।
समेत्य ननु दुर्दशां त्रिदशलोकनालीकिनी-
विपाटनपटुः क्षणादभवदद्भुतं किं विभो ।। ८०

शार्दूलविक्रीडितम्

श्रीवत्सो विशिखः शरासनमपि स्वर्णाचलश्शिञ्जिनी
भोगीन्द्रो वसुधा रथस्तव महातूणा नदीनो यतः ।
यस्त्वं श्रीदसखस्त्वया ननु जितास्तिस्रः पुरो दुर्मदाः
सर्वं ह्यर्थवता जितं त्विति वचः स्थाने नयज्ञोदितम् ।। ८१

(श्रीवत्सः श्रीवत्सलाञ्छनो विष्णुः शिवस्य विशिखो बाणः । स्वर्णाचलो मेरुपर्वतः शरासनं धनुः । भोगीन्द्रः सर्पराजः शिञ्जिनी मौर्वी । वसुधा भूमिरेव रथः स्यन्दनः । नदीनः समुद्र एव महातूणः तूणीरम् । श्रीदः कुबेरः सखा यस्य स श्रीदसखः । नयं जानातीति नयज्ञः । तेनोदितं कथितं वचः वचनं स्थाने साम्प्रतम् ।)

शिखरिणी

पुरा गृष्टीभूय त्रिपुरहर ते पादकमलं
विचिन्वन् भग्नाशो हरिरजनि हंसाकृतिरजः ।
दिदृक्षुर्मूर्धानं तव विफलयत्नोऽ भवदहो
नरस्त्वत्पारम्यं कथमिव विजानामि कृपणः ।। ८२
(गृष्टीभूय वराहो भूत्वा । द्रष्टुमिच्छुर्दिदृक्षुः ।)

द्रुतविलम्बितवृत्तम्

अहिगणो हि गणोत्सुकभूषणं
शुभसितं भसितं हिमवालुका ।
सुविषमं विषमम्बुधिजं सुधा
परम ते रमते हि मनस्त्वयि ।। ८३

स्रग्धरा

यस्यास्ताटङ्कभाग्यं कतिचन कृतिनः कण्ठसूत्रप्रभावं
सीमन्तोपान्तकान्तारुणमसृणरजस्सान्द्रसिन्दूरपुण्यम् ।
यच्छंसन्ति प्रभो ते गरलकवलनेऽप्यात्तमृत्युञ्जयत्वं
सा नः पायादपायादनवधिकरुणाजीवनाडी त्वदीया ॥ ८४
(शिवस्य जीवनाडी पार्वती नः पायादिति भावः ।)

मन्दाक्रान्ता

कैलासाभं वृषभमुमया साकमारुह्य देवै-
र्ब्रह्मेन्द्राद्यैर्जयफणितिभिः पठ्यमानाङ्घ्रिभूमा ।
मा भैषीस्त्वं बत यमभयादागतोऽस्मीति साक्षा-
दायातस्सन् शमनहर मां पाहि देहावसाने ॥ ८५

शिखरिणी

कदा वा कैलासे धृतगणविलासे पशुपते
स्थितं त्वां चित्पीठे कृतनिगमपाठे सति विधौ ।
चिरं दृष्ट्वा साम्ब प्रणतजनतालम्ब शिव मे
प्रसीदेति क्रोशान्निमिषमिव नेष्यामि दिवसान् ॥ ८६

स्रग्धरा

शम्भो ते पादपीठं शमधनरचितस्तोत्रपाठं क्रियान्नः
क्षेमं हैमप्रणम्रामरमकुटमणिश्रोणिशाणाश्मखण्डः ।
यस्मिन् देवाभिवृष्टस्फुटमधुरमधुस्यन्दमन्दारगुच्छाः
नृत्यत्कैवल्यलक्ष्मीत्रुटितकुचतटीमुक्तमुक्तासरन्ति ॥ ८७
(शमो धनं येषां ते शमधनाः । हेम्ना रचितं हैमम् । मुक्तासरन्ति मुक्ताहारा इवाचरन्ति ।)

शार्दूलविक्रीडितम्

नौका संसृतिवारिधेर्दिविषदां दीव्यच्छिरोमुक्तिका
राका सेवकदृक्चकोरवयसां मुक्तिश्रियः पीठिका ।

श्रीनिर्मोकमतल्लिका पदतुलाकोटीकृताहीशिका
शम्भो स्फाटिकपादुका भवतु नश्चेतस्तमोदीपिका ।। ८८
(अत्र मालारूपकम्)

मन्दाक्रान्ता

निर्गच्छन्त्या नतजनपरीरम्भसंरम्भकृत्ये
हस्ताघातस्फुटितमिव यन्मुक्तिलक्ष्म्या द्विधैव ।
भूतिस्वच्छ्रीचरणवसतेः स्फाटिकं श्रीकवाटं
तत्पायान्मां भुवि पशुपते पादुकायुग्ममेतत् ।। ८९
(परीरम्भ आलिङ्गनम् । संरम्भ उत्साहातिशयः)

शिखरिणी

विधिर्विष्णुर्युष्मन्निरुपमितपादाब्जयुगळी-
रजस्सत्त्वात् सृष्टिस्थितिकरणदक्षौ प्रभवतः ।
भवत्तार्तीयीकी दृगपि कुरुते रौद्ररचनां
शिवस्त्वं चिन्मात्रे विहरसि परं निर्गुणपदे ।। ९०

हरिणी

कुरु मयि कृपां शम्भो डिम्भोऽस्मि ते गिरिजापते
गणय न च मे दोषं रोषं विमुञ्च कृपानिधे ।
नतिशतमहं कुर्वे सर्वेश तावकपादयोः
वितर सुदृढां भक्तिं भुक्तिं सुमुक्तिमपीहिताम् ।। ९१

शशिधरकलाचूडे नीडे जगत्खगसन्तते-
रनवधिकृपाराशौ श्रीशौरिदृग्झरीरुट्पदे ।
विरचितजगत्सर्गे भर्गे निरर्गलवैभवे
सततमसितग्रीवे देवे रतिर्मम शाश्वती ।। ९२
(रतिर्भक्तिः)

सकलमरुतां नेता दाता पुमर्थततेर्महान्
त्रिपुरहर ते जाया माया जगत्त्रितयप्रसूः ।

सकलसुकलालम्बो लम्बोदरश्च तनूभवो
वयमधिगतत्रासा दासा दयाकर पाहि नः ।। ९३

स्वयमपि भवक्रान्ता भ्रान्ता विधिप्रमुखास्सुराः
कथमिव भवध्वंसं हिंसाश्रितस्य वितन्वते ।
तदयि हृदय स्थाणौ क्षोणौ भवार्तिहरे हरे
कलय सुदृढां भक्तिं मुक्तिं त्वमिच्छसि चेत् पराम् ।। ९४

स्रग्धरा

एकाकिन्या मृडान्यास्सकृदधरसुधास्वादनायोद्यताया
मह्यं देहीति दीनाक्षरमयममृतं व्याकिरन्तीव शश्वत् ।
अन्योन्यं याचमाना दरहसितरुचा सप्रसूनोपहारं
स्वामिंस्ते पञ्चवक्त्री वितरतु कृपया नः पुमर्थान् पुरारे ।। ९५
(पञ्चानां वक्त्राणां समाहारः पञ्चवक्त्री)

साकूतैरद्रिकन्यावदनसरसिजादर्शने स्मेरतारै-
र्भृङ्गीशास्यावलोके प्रणतसुरसभावीक्षणे सानुकम्पैः ।
शश्वत्सानन्दबाष्पैर्गुहगणमुखरप्रेक्षणे त्वत्कटाक्षै-
र्दृष्टश्शम्भो कदाहं तव पदनिकटे प्राञ्जलिः प्रार्थयिष्ये ।। ९६

पृथ्वीवृत्तम्

नमस्सुगुणसिन्धवे विनमतां विपद्बन्धवे
नमोऽजगवपाणये नतसुरासुरश्रेणये ।
नमोऽखिलचराचरान्तरजुषे परञ्ज्योतिषे
नमो हृतपुनर्भवे मयि दयावते शम्भवे ।। ९७

भ्रमंश्चरणपल्लवोपरि परिष्वजन् पुष्करं
विलोलकरफूत्कृतैर्विपुलकुम्भकूटोपरि ।
स्खलन्नथ कटिस्रुते गजमुखस्य दानप्रदे
मनोमधुकरश्चिरान्मम निमज्ज्य विश्राम्यतु ।। ९८

आर्या

सकृदास्यचुम्बनकृतौ षाण्मुख्यं यस्य कुतुकिनोः पित्रोः
अभिनन्दयति मनो नः कुशलं कन्दलयतादयं स्कन्दः ।। ९९

हरिणी

मुहुरभिहतः कूले गङ्गातरङ्गसमुत्करैः
कनककदलीगर्भे मुक्तास्रजेव विभाति यः ।
स तरुणशशी पापं तापं धुनोतु मनोगतं
व्यपगतमलः शीर्षोत्तंसस्तदाश्रयगौरवात् ।। १००

अवतु स जगद्व्यापी गोपीवहद्दधिकुण्डिका
स्खलति चरणे भीता माता सती पथि पङ्किले ।
बसव इति यस्सस्मारास्मानिति स्वकरेण ताम्
अभवदरमुद्धर्ता भर्ताश्रितप्रकरस्य नः ।। १०१

बसव इति यो ब्रूते भूतेश्वराङ्घ्रिसुभक्तिभाक्
स भवति तया भक्त्या मुक्त्या श्रिया परिरभ्यते ।
ध्रुवमिति वदन्त्यार्या भार्यागमेषु (?) विचक्षणा-
स्तदहमधिकं वन्दे तं देवमाशु वृषभाभिधम् ।। १०२

स्रग्धरा

मुक्तिश्रीनृत्यरङ्गं श्रितजनहृदयानेकपालानदेशः
कोशः शैवीविभूतेः प्रमथगणमनोहंसदुग्धाम्बुराशिः ।
आदर्शः पुण्यराशेर्भजकजनजरामृत्युधात्रीध्रवज्रः
कल्याणं नः समग्रं कलयतु गिरिशावासकैलासशैलः ।। १०३

उत्पलमाला

शिवभक्तिसुधातरङ्गिणीयं
रचिता प्राग् बसवप्पशास्त्रिणाभूत् ।
पठतस्तनुते नरान् क्षणार्धे
धृतबालेन्दुनभस्तरङ्गिणीकान् ।। १०४

इति बसवप्पशास्त्रिविरचिता शिवभक्तिसुधातरङ्गिणी समाप्ता ।

बसवप्पशास्त्रिणा कानिचन काव्यानि संस्कृते कन्नडभाषया च विरचितानि यानि विद्वद्भिरुल्लखितानि किन्तु अद्यास्माभिर्नोपलभ्यन्ते । तेषां नामानि अत्रोल्लिखामः ।

१. बिल्ववृक्षपूजाविधिः
२. शाङ्करी नक्षत्रमाला
३. बसवेशाष्टकम्
४. अष्टमूर्तितनयाष्टकम्
५. दक्षिणामूर्त्यष्टकम्
६. सदाशिवाष्टकम्
७. मालतीमाधवम्
८. हर्षचरितम्

एतेषां गवेषणं विद्वद्भिः कर्तव्यम् ।

कन्नडभाषायां प्रसिद्धस्य कुमारव्यासभारतस्य वाचने बसवप्पशास्त्री तदानीन्तनकालेऽग्रणीरेव बभूव । तस्य पुस्तकानि नानापरीक्षाणां पठ्यानि आसन् । १८९० तमे वर्षे मेट्रिक्युलेषन्परीक्षायाः विद्यार्थिभ्यस्तस्य कन्नडनीतिशतकं पाठ्यं इति निर्दिष्टम् आसीत् । तदा बि. श्रीनिवासय्यङ्गार्यः शास्त्रिकृतकन्नडानुवादस्य विषये आक्षेपान् कृतवान् । तान् आक्षेपान् निरसितुं बसवप्पशास्त्री स्वयं 'विमर्शेय ओरेगल्लु' इति लेखनमेकं प्राकटयत् । तत्र तस्य दृढं व्याकरणज्ञानं निशिता विमर्शशक्तिश्चेति द्वयमपि व्यक्तीभवति ।

निधनम्

एवं ख्यातः सकलविद्वज्जनप्रियो बसवप्पशास्त्री १८९१ तमवर्षस्य फेब्रवरीमासे कैलासवासी अभवत् । तस्य निधनेन बहवः सन्तप्ताः कन्नडभाषायां चरमगीतानि व्यरचयन् । पि.आर्. करिबसवशास्त्री, नञ्जनगुडुसुब्बशास्त्री, आर्. तातः इत्यादयः स्वश्रद्धाभावं प्राकटयन् ।

बसवप्पशास्त्रिण आयुष्यकालो न दीर्घः । (१८४५-१८९१), तथापि तावता कालेन स प्राप्नोदनितरसाधारणमुभयभाषापाण्डित्यम्, उभयोरपि भाषयोर्विपुलं साहित्यमरचयत् इत्येतत् प्रशंसार्हम् । बसवप्पशास्त्रिणः समाधिस्थलं मैसूरुसमीपे विद्यते । कन्नडप्राध्यापकानां डा. टि.वि. वेङ्कटाचलशास्त्रिणां मुखाच्छ्रुतं यद् बसवप्पशास्त्री अश्वशकटेन गच्छन् आकस्मिकतया पतितो मृत्युवशीभूत इति । निष्करुणो मृत्युः केन रूपेणापि प्राणान् हरति ।

कन्नडभाषायाः प्रसिद्धः कविः डा. डि.वि. गुण्डप्पोऽवदत् 'यद्यपि बसवप्प-शास्त्रिणः प्रतिभा जन्मसिद्धासीत्, तथापि सा सर्वाङ्गमनोहरी भूत्वा पुष्टा च सती लोकरञ्जिका जाता तस्य पाण्डित्यरूपतपःप्रभावादेव' इति ।

१९४५तमे वर्षे बसवप्पशास्त्रिणः जन्मशतमानोत्सव आचरितः । तदा एस्.जि. शास्त्री इत्थमवदत् मम पितामहस्य गरळपुरीशशास्त्रिणः गृहे बसवप्पशास्त्री अळियलिङ्गराजेन साकं विद्याम् अभ्यस्यति स्म । मम पिता कवितिलकबिरुदभूषितः अय्यशास्त्री बसवप्पशास्त्रिणः सहाध्यायी चासीत् । गरलपुरीशशास्त्रिणाम् आदेशेन बसवप्पशास्त्री कन्नडकवितारचनां प्रारभत । न्यूनातिन्यूनपक्षेऽपि दशसहस्रश्लोकानां कण्ठस्थीकरणं विना कवित्वे न प्रवर्तनीयम् इति गरलपुरीशशास्त्री पुत्रम् उपदिश्य, तथा दशसहस्राधिकान् श्लोकान् कण्ठस्थीकृतवन्तं बसवप्पशास्त्रिणं दृष्टान्तत्वेन प्रदर्शयति स्म इति ।

प्रा. एस्. रामचन्द्रराव् वदति स्म 'बसवप्पशास्त्रिणा कृतः अभिज्ञानशाकुन्तल-कन्नडानुवादः कालिदासस्यापि शिरः आन्दोलयति' इति । कडबद नञ्जुण्डशास्त्री अवदत् 'अप्रयत्नजन्यं सरसं काव्यं बसवप्पशास्त्रिणः स्वम्' इति ।

एवं विद्वज्जनाभिनन्दितः सकलजनप्रियः सरस्वत्याराधनसार्थकीकृतजन्मा शिवचरणारविन्दनिमग्नमनाः श्रीबसवप्पशास्त्री कर्णाटककविकुलस्याभरणायते । तत्स्मरणमस्माकं स्फूर्तिकारणं भूयदिति शम् ।



बसवप्पशास्त्री

कर्णाटकराज्यस्य सुदीर्घे वाङ्मयेतिहासे अतिविशिष्टेन योगदानेन नक्षत्रायमाणाः अनेके महान्तः विद्यन्ते । इदं संस्कृतसाहित्येतिवृत्तं स्वातन्त्र्यपूर्वकालीनयुगस्य संस्कृत साहित्येतिहासं समीचीनतया चित्रयति। किन्तु स्वातन्त्र्यसङ्ग्रामस्य कालघट्टे प्रवृत्तस्य संस्कृतसाहित्यसर्जनस्य इतिवृत्तरचना सम्यक् न जाता । कालक्रमेण इदम् अन्धकारयुगमिव सम्पद्येत कदाचित् । अस्मात् कारणात् १८५० तः १९५० पर्यन्तम् एकस्य शताब्दस्य कालखण्डे कर्णाटकस्य विविधेषु प्रदेशेषु निवसतां संस्कृतवाङ्मयस्य महत्तां वर्धयितुं कारणीभूतानां महतां योगदानविषये, तेषां जीवनगाथाविषये च शतं पुस्तकानि प्रकाशनीयानि इति अस्माकम् आशयः । अनया योजनया संस्कृतवाङ्मयस्य नवेतिहासः निर्मितः भविष्यति। एतेन, आधुनिकयुगेन सह गतशताब्दस्य सांस्कृतिकबन्धोऽपि दृढो भविष्यति इति मे विश्वासः।

अस्यां ग्रन्थमालायां महोदयेन आस्थानविदुषां बसवप्पशास्त्रिमहोदयानां संस्कृतयोगदानमधिकृत्य विरचितं पुस्तकमिदं प्राकाश्यं नीयते। विद्वद्वरेण्यः कविः श्री एच्.वि.नागराजराव्महोदयः निरन्तरं संस्कृतशास्त्रसेवायां रतः शताधिकप्रबन्धकर्ता । अस्माकं प्रार्थनानुरोधेन ग्रन्थपुष्पिकामिमां अल्पे काले विरचय्य प्रदत्तवानिति तस्मै महाभागाय कार्तज्ञ्यं निवेदयामः ।

प्रो. मल्लेपुरं जि. वेङ्कटेशः, डि लिट्
कुलपतिः

Rs. 50/-

कर्नाटकसंस्कृतविश्वविद्यालयः
पम्पमहाकविमार्गः,चामराजपेटे,बेङ्गलूरु - ५६००१८